Sans. Ms. 181.4		
V414 826-Ms.		वेदान्त सूत्राणि ; सदानन्द कृत १४ पत्रक ॥ ला० अ० २३ पं० प्र० पृ० हृ० लि०

वेदान्तसूत्राणि

उत्तरमीमांसा

वेदान्त

ॐ श्रीपरमात्मने नमः यस्मिन्नुद्बुद्धविश्वं भिन्नाभिन्नमिव स्थितं तं वंदे परमानंदं तुरीयं साक्षिणं स्वकम् १ इह खलु सकललो
कहितैषी भगवान्वेदव्यासो मुमुक्षूननात्मनो विवेकेन नित्यशुद्धबुद्धमुक्तस्वभावमात्मानं बोधयितुं सूत्राणि प्रणिनाय तेषु च श्रीमच्छं
करसुरेश्वराद्याचार्य्यभाष्यवार्त्तिकादिरूपाण्निबंधान्निबबंधुः तेषां चातिविस्तृततत्वात् मंदबुद्धीनां दुरवगाहत्वाच्च ननु सहसा नेभ्यर्था
त्मानात्मविवेकः संभवतीति तदनुग्रहाय तान्येवाश्रित्य संक्षेपेणात्मस्वरूपं प्रकाश्यते तत्र स्वप्रकाशपरमानंदरूपे आत्मनि सर्वसंसार
धर्म्मासंसर्गिणि स्थूलसूक्ष्मशरीरद्वय तत्कारणाविद्याख्योपाधित्रयाविवेकेन मिथ्याभूतस्यापि संसारस्य सत्यत्वप्रतिभासो बन्धस्त
न्निवृत्तिस्तु मोक्षः तदुक्तं अनात्मभूते देहादावात्मबुद्धिस्तु देहिनां साविद्या यत्कृतो बंधस्तन्नाशो मोक्ष उच्यत इति उक्तं च वार्तिककृ
द्भिः प्रत्यग्याथात्म्यसंमोहाज्जगत्सदिति भासते प्रत्यग्याथात्म्यसंबुद्धौ न सत्तन्नासदुच्यत इति अथ कथं निर्धर्मक आत्मनि जीवे
श्वरादिविभागः कीदृशो वा शरीरत्रयविवेकादात्मज्ञानमिति चेदुच्यते अत्र मायोपहितचैतन्यमीश्वरः अंतःकरणतत्संस्कारावच्छि
न्नाविद्याप्रतिबिंबितचैतन्यं जीव इति अविद्यावच्छिन्नचैतन्यं वा जीवः अत्र चांतःकरणनानात्वाज्जीवनानात्वं ननु वास्तवं अविद्यानां
नानात्वाद्वा न चात्मनानाभावः शंकनीयः मायाभासेन जीवेशौ करोति रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय इंद्रो माया
भिः पुरुरूप ईयत इत्यादिश्रुतेः एक एव तु भूतात्मा भूते भूते व्यवस्थितः एकधा बहुधा चैव दृश्यते जलचंद्रवदिति स्मृतेश्च बहुरूप इ
वाभाति मायया बहुरूपयेति च न चोपाधिकृतभेदे वास्तवाभेदे च सति कथं सर्वज्ञत्वकिंचिज्ज्ञत्वादिव्यवस्था सिध्यतीति वाच्यं
दर्पणस्य मुखमात्रसंबन्धेऽपि प्रतिमुखे मालिन्यवत् प्रतिबिंबे जीवे किंचिज्ज्ञत्वादिसंसारः न बिंबे ब्रह्मणि उपाधेरेव प्रतिबिंबपक्षपा
तित्वात् पक्षपातित्वं तु प्रतिबिंबे उपाधिगतधर्मारोपकत्वं एवं जीवेश्वरविभागं संक्षेपेण प्रकाश्य जीवोपाधेर्जीवस्य च त्रैविध्यं
विस्तरेण प्रपंच्यते तत्राविद्यांतःकरणस्थूलशरीरावच्छिन्नो जाग्रदवस्थाभिमानी विश्वः स च देहेंद्रियादिषु प्रवेशाद्व्यापनाद्वा
विश्व इत्युच्यते विश प्रवेशने विश्लृ व्याप्तौ इति स्मरणात् तत्सृष्ट्वा तदेवानुप्राविशत् स च त्यच्चाभवदिति श्रुतेश्च जाग्रदवस्थालिं
द्रियवृत्तिकालीनार्थोपलंभः तत्र च विराडारंभोऽन्य प्रत्यक्षादिप्रमाणषट्केन व्यवह्रियमाणत्वात् व्यावहारिकं विश्वाख्येन
जीवेनोपभुज्यते व्यावहारिकत्वं तु ब्रह्मज्ञानेतराबाध्यत्वे सति ब्रह्मज्ञानबाध्यत्वं पारमार्थिकत्वं ब्रह्मज्ञानेनैवाबाध्यत्वं तु
प्रातिभासिकत्वं अथवा अविद्यातिरिक्तदोषाजन्यत्वं व्यावहारिकत्वं अविद्यातिरिक्तदोषजन्यत्वं तु प्रातिभासिकत्वं तदु
भयाधिष्ठानत्वं तु पारमार्थिकत्वमिति विवेकः अत्र यद्यपि विश्वनामकर्तृत्वमप्रत्यक्षं तच्च वक्ष्यमाणमनुमानादिनानुभू
यते न चापि व्यावहारिकं सर्वं विश्वेनैव ज्ञायत इति नियमाद्विश्वावतः स्थूलशरीराभिमानित्वाच्च न तस्या अवस्थात्रया
पकत्वं न च शुक्तिरजतादिज्ञानानां प्रातिभासिकत्वेन कथं जागरणत्वमिति वाच्यम् तद्विषयस्याव्यावहारिकत्वेऽपि इदि

वा अथ वा तु प्रतीयमानत्वे सति अधिष्ठानातिरिक्तस्वरूपशून्यत्व १ ब्रह्मज्ञानेतराबाध्यत्वे सति ब्रह्मज्ञानाबाध्यत्वम् ८५८

रामः
।

प्रवृत्तिव्यापारकालीनत्वाज्जागरणत्वोपपत्तिः एवं जाग्रद्भोगजनककर्मक्षये सति स्वाप्नभोगजनककर्मोदये च सति निद्राख्यया
तामसवृत्त्या स्थूलदेहाभिमाने दूरीकृते सर्वेन्द्रियेषु देवतानुग्रहाभावात् स्वस्वगोलकेषु निर्व्यापारतया लीनेषु सत्सु सूक्ष्मोपाधिष्ठ
योपहितः स्वप्नावस्थाभिमानी तैजसः आदित्यादिज्योतिरन्तरेणापि भासकत्वात् स्वप्नावस्था त्विन्द्रियवृत्त्यभावकालीनार्थोपल
म्भः ननु स्वाप्निकपदार्थानां किमुपादानमविद्या उत मनो[illegible]गतवासना उच्यते आवरणविक्षेपशक्तिमत्यविद्यैव शुक्तिरजतादि
वत्स्वाप्नार्थाकारेण परिणमते ज्ञायते चाविद्यावृत्त्यैवेत्येके अत्र चाविद्यापेक्षया परिणामः चैतन्यापेक्षया विवर्तः एतयोर्लक्षणं च
तात्त्विकोऽन्यथाभावः परिणामः यथा सुवर्णस्य कुण्डलादि अतात्त्विकोऽन्यथाभावो विवर्त इति अथवाऽवस्थान्तरापत्तिः परिणा
मः अवस्थान्तरभाने तु विवर्त्तः तदुक्तं अवस्थान्तरभानं तु विवर्तो रज्जुसर्पवत् मन एव वा जन्तुरगाद्याकारेण परिणमते अ
विद्यावृत्त्या च ज्ञायत इत्यपरे अत्र द्वितीयस्य गौरवेणाविद्याया एवादृष्टद्वारेण सर्वत्रार्थाध्यासज्ञानाध्यासोपादानत्वकल्पने ला
घवात् अध्यासस्य लक्षणं तु सत्यानृते मिथुनीकृत्येति भाष्यकारवचनात् सत्यानृतवस्तुसम्भेदावभासो नाम चिन्निष्ठाऽविद्या
अविद्याध्यासः सम्बन्धः एकोऽनवच्छिन्नोऽनादिरनुत्पन्नः द्वितीयस्तु सर्वसर्वाध्यासस्य लक्षणं वाच्यमुत्तरोत्तराहंकाराद्यध्यासो बीजांकुरवदनादिः यद्वा कार्याध्यासः
परत्र परावभास इत्येतावन्मात्रस्यैवोभयानुगतस्य लक्षणत्वात् परत्र रजतभिन्ने इदमि परस्य इदंभिन्नस्य रजतस्यावभासोऽध्यास
अविद्याध्यस्तौ सम्भौ वा चित्तौ इत्यर्थः न चात्माश्रयादिदोषः शङ्कनीयः अनादित्वेनैव तन्निरासात् स्वप्रकाशात्मन एव तज्ज्ञानाच्चेति दिक् न च तर्हि शाहेम
नः परिणाम इति व्यपदेशो व्यर्थ इति वाच्यम् मनोगतवासनानिमित्तत्वेन तथात्वोपपत्तेः न च तदा मनसो सूक्ष्माकारपरिणा
माभ्युपगमे दृष्टृत्वसम्भवेन आत्मनस्तदानीं स्वयंज्योतिष्ट्वासिद्धिरिति शङ्क्यम् बहिरिन्द्रियवृत्त्यभावेन तदानीं मनसोऽग्राहक
त्वात् सवृत्तिकान्तःकरणावच्छिन्नचैतन्यस्य प्रमातृत्वनियमात् तथा च तदानीं मनःसत्वेपि प्रमात्रभावाद्द्रष्टृत्वाभावः अथ
किमधिष्ठानं स्वप्नभ्रमस्येति चेच्छृणु मनोवच्छिन्नजीवचैतन्यमित्येके मूलाज्ञानावच्छिन्नब्रह्मचैतन्यमित्यपरे तथाहि जाग्रद्बो
धेन स्वप्नभ्रमनिवृत्तिदर्शनात् भ्रमनिवृत्तिं प्रति ह्यधिष्ठानज्ञानस्य कारणत्वात् तच्च मूलाज्ञानावच्छिन्नब्रह्मचैतन्यस्य संसारा
कारकाले न सम्भवतीति जीवचैतन्यमेवाधिष्ठानं यदि पुनर्ब्रह्मज्ञानादेवाज्ञाननिवृत्तिः स्यात् तदा रज्ज्वादिभ्रमेण सर्पभ्रमनिरो
धानवदधिष्ठानज्ञानाभावेपि जाग्रद्भ्रमेण स्वप्नभ्रमतिरोभावोपपत्तेः तथा च मूलाज्ञानावच्छिन्नब्रह्मचैतन्यमेव स्वप्नाध्यासा
धिष्ठानमिति पक्षे न दोषः न च भवत्वेवं द्वितीयपक्षे जीवचैतन्यस्य तु सर्वदा भासमानत्वेनानावृतत्वात् अधिष्ठानत्वासंभव इ
ति वाच्यं स्वप्नाध्यासानुकूलव्यावहारिकसंघातभानविरोध्यज्ञानस्यात्र स्वीकारात् स्वप्नदशायां नाहं मनुष्य इत्यादिप्रा
तीतिकसंघातान्तरभानाभ्युपगमाच्च शय्यायां स्वपिमीति शय्यान्तरस्वज्ञानमामग्रभावस्य तुल्यत्वात् ननु तर्हि व्यावहारिकसंघा

न ज्ञानेनावस्थाज्ञानस्य नष्टत्वात् कदाचित्स्वप्नमुमानस्यादितिचेन्न यावंति ज्ञानानि तावंत्यज्ञानानीत्यभ्युपगमात् तथाच श्रुति
ज्ञानेनैवध्यावस्थिकस्य धान ज्ञानेनाज्ञाननिवृत्तावपि पुनरपि कदाचिज्जन्मस्वप्नमवश्यं स्वप्नावस्थानुपपत्तिरिति संक्षेपः ॥
एवंप्रतीतिरंतःकरणोपाधिद्वयाभिमानेन तस्य स्वावच्छिन्नो विद्यामात्रोपहितः सुषुप्त्यवस्थाभिमानी प्राज्ञः सुषुप्त्यवस्था
तु जाग्रत्स्वप्नभोगप्रदेन विश्रांतस्य जीवस्य तदुभयकारणकर्मक्षये सति अज्ञानमात्रावच्छिन्नस्य सवासनस्यांतःकरणस्य
कारणात्मनावस्थाने सति विश्रामावस्थानं तथा च श्रुतिः तद्यथास्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रांतः
संहत्य पक्षौ संलयायैव ध्रियत एवमेवायं पुरुष एतस्मा अंताय धावति यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्य
ति श्येनः शीघ्रगतिः श्येनः विपरिपत्य विशेषेण नानादेशेषु पतित्वा श्रांतो भूत्वा पक्षौ संहत्य संयुक्तौ कृत्वा लयाय नीडा
य ध्रियते नीडप्राप्त्यर्थं यतते अंताय उपरतावस्थायै प्राप्त्यर्थं धावति यतते तत्र जाग्रत्स्वप्नभोग्यपदार्थज्ञानाभावेपि साक्ष्याका
रेण स्वाकारं संस्कारतापन्नं जाग्रत्स्वप्नविषयकमवस्थाज्ञानाकारं चाविद्यावृत्तित्रयमनुभूयते अहंकाराभावाच्च नैकावि
शिष्टवृत्तिः सुषुप्त्यभावप्रसंगात् वृत्तिरूपस्योपलंभस्याभावान्न प्रलयेतिव्याप्तिः तत्र तत्कल्पने बीजाभावात् इदं तु सुख
महमस्वाप्सं न किंचिदवेदिषमिति सुप्तोत्थितस्य परामर्शात् अननुभवे परामर्शानुपपत्तेश्च तदुक्तं वार्तिककृद्भिः न चे
दनुभवव्याप्तिः सुषुप्तस्याभ्युपेयते नावेदिषं सुषुप्तोहमिति धीः किंबलाद्भवेदिति अहंकारस्य स्थाने समय एवानुभूयते।
तदानीं लीनत्वात् अंतःकरणोपरागकालीनानुभवजन्यत्वाभावेन च तत्तोल्लेखाभावेपि स्मरणानुपपत्तिः स्मरणेन तत्तोल्ले
खनियमाभावाच्च न च नावेदिषमितिप्रत्ययस्यानुमानपरत्वं तथाहि स्वप्नजागरयोर्मध्यकालः ज्ञानसामान्याभाववान् अ
वस्थाविशेषत्वात् ज्ञानसामग्र्यभावाद्वा मूर्छावदिति वाच्यम् हेत्वभावात् ज्ञानसामग्र्यभावस्यानोप्याश्रयग्रस्तत्वाच्च प
क्षतासानाच्च न चाहमस्वाप्समिति अहंकाराश्रयत्वेन प्रतीयत इति वाच्यम् मुखप्रतिबिंबाश्रयदर्पणे [redacted] कुंकुमलौहित्या
ध्यासेन रक्तमुखप्रतिबिंबप्रतीतिवदहंकाराश्रयत्वस्यापि चेत्तस्य स्मरणाश्रयत्वादहमस्वाप्समिति सामानाधिकरण्येन प्रतीतिः
न पुनरहं सुखीतिवदाश्रयतया स्मृतिसंशयविपर्ययाणां साक्षिचेतनाश्रयत्वनियमः अविद्यावृत्तित्वात् अहंकारस्य च प्र
माणजन्यज्ञानाश्रयत्वात् विस्तरस्तु स्वरूपनिर्णयेऽनुसंधेयः तदेवं सुषुप्त्यवस्थायामस्यानंदभोगः तदुक्तं चतुःसुषुप्त्यव
स्थाभिमानी प्राज्ञः तथा च श्रुतिः आनंदभुक्चेतोमुखः प्राज्ञस्तृतीयः पादः न च सुषुप्तौ अंतःकरणसत्त्वे जीवाभा
व इति वाच्यम् तदानीं तस्य संस्कारेणावच्छेदान्न जीवाभावप्रसंगः न वा सार्वज्ञापत्तिरिति ननु सुषुप्तौ दुःखाभाव एवा
नुभूयते न तु सुखं सुखादिजनकसामग्र्यभावात् न च जन्यसुखबाधाभावेपि स्वरूपसुखं निर्विकल्पकमनुभूयत इति वाच्यम्

सु॰ प्र॰ २

अंताकाशे ५

रामः २

विषयानंदातिरिक्तस्वरूपानंदे मानाभावात् विषयसुखस्य तत्साधनाद्यभावे कामुकानां निर्वेददर्शनात् तदुक्तं सुषुप्तावुत्थि
दि २ तानां च निर्विद्यंते कामुकाः । दृष्टेयमंतरेणैव कामिनीं यामिनीगता ॥ मुक्ताश्च परमानंदं न स्पृशंत्यस्मरणादयः । सुखादन्यत्सुखं नैव
निर्वेदो नोपपद्यते ३ तत्सुखं च विस्मृतं चेत्सम्यक् सुखमस्वाप्समिति स्मरणं न घटते दुःखाद्युत्पन्नं भवेत्त्रियं ३ सुखमेव हि तिलस्यात्
सुखात्मत्वमात्मनः स्यादिति नेमिनीयेति चेत् अध्यात्मविद्यासत्कालीनत्वेन भातोऽसि सुषुप्तोत्थितस्य विषयसामग्र्यभावेपि
तूष्णीं भावस्य सुखप्रसादादिलिंगदर्शनेनानुभूतसुखसंस्कारसंभवात् न हि सुषुप्तौ स्वरूपसुखानुभवविनाशो भवति आक स्वरूपसुखविनाशक कारणाभावेन ५
स्मिकत्वापत्तेः तदुक्तं भगवता वसिष्ठेन सुषुप्तादौ जाग्रत्स्थाने यत्सुखं त्वनुभूयते तत्सुखं भावयन्साक्षादात्मानंदं समश्नुते ।
न च कथं तादृशसुखानुभववित्तयानर्थाव हेयं जाग्रत्त्वमिति वाच्यम् प्राग्जन्मार्जितकर्मप्राबल्यात् तथा च केवल्यश्रुतिः ।
पुनश्च जन्मांतरकर्मयोगात्स एव जीवः स्वपिति प्रबुद्ध इति उक्तं च स्मृतिनाम्नि विशिष्टविद्यारत्ने अज्ञानविदि नाचित्सान्सुखमा
नंदभोजने भुक्ते ब्रह्मसुखं त्वमस्मिन्कावहिर्यात्यप्यकर्मणा । कर्मजन्मांतरे भूय तथा गाढं पुनः इति केवल्यशास्त्रवाग्याकर्मजोबोध
ईरितः २ किंचित्काले प्रबुद्धः स ब्रह्मानंदस्य वासनानुगच्छेत तूष्णीमास्ते निर्विषयः सुखी ३ कर्मभिः प्रेरितः पश्चात् नाना
दुःखानि भावयन् शनैर्विस्मरति ब्रह्मानंदमेषोखिलो जनः ४ प्रागूर्ध्वमपि निद्रायाः पक्षपातो दिने दिने ब्रह्मानंदे नृणां तेन प्राज्ञो
ऽस्मिन्विवदेत कः इति ५ किंच न हि ब्रह्मलोकसुखमप्यनादृत्य सनकादिनारदादिभिरनुभूतस्य स्वरूपसुखस्यानंतोर्वीकः श्रुतिस्मृ
त्युक्तसांगोपांगैः कर्मभिस्तत्तत्कर्मफलत्यागेन भगवदनुग्रहसंपादनद्वारा जनकाजातशत्रुमुचुकुंदादिभिः काम्यमानस्यानस्य वि
षयलंपटपामरनिर्वेदमात्रेणापलापः कर्तुं शक्यते न हि दुःखाभावस्य हि स्वरूपसुखस्य त्यागः संभवति श्रुतिस्मृतिविरोधात् तथा हि
तैत्तिरीये भृगुवरुणसंवादे आनंदाद्ध्येव खल्विमानि भूतानि जायंते आनंदेन जातानि जीवंति आनंदं प्रयंत्यभिसंविशंति छां
भगवो दोग्ये सप्तमप्रपाठके सनत्कुमारनारदसंवादे सुखं विजिज्ञासस्वेति यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुखं भूमा
त्वेव विजिज्ञासितव्य इति भूमानं भगवो विजिज्ञास इति यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा अथ यत्रान्
यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पं यो वै भूमा तदमृतं अथ यदल्पं तन्मर्त्यं स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नीति बृहदा
प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादंतरतरं यदयमात्मेति । विज्ञानमानंदं ब्रह्मेत्यादिश्रुतिभ्यः तस्य परमानंदरूपत्वो
पदेशात् न च तर्हि कथं सुखमुत्पन्नं नष्टमिति प्रतीतिरिति शंक्यं तस्य नित्यत्वेपि धर्मादिजन्यांतःकरणवृत्तिव्यंग्यत्वात् तदु
त्पत्तिविनाशोपचारात् अज्ञानमात्रव्यवहितस्य तस्य चाज्ञानस्य सर्वत्र मात्रमध्यात्मवाक्यार्थज्ञानमात्रनिवर्त्यत्वात् विद्यानिवृत्त्या
प्राप्तिरिव भवतीति तदुद्देशेन मुमुक्षुप्रवृत्तिसंभवः न हि विषयसुखं स्वरूपसुखादतिरिच्यते विषयप्राप्तौ सत्यां अंतर्मुखे मन

स्वं॰ ष्टं॰ ३

मिस्वस्वरूपस्फुरणे वपतिविंबसंभवात् स्वाभिमुखे दर्पणे मुखवत्प्रतिबिंबवत् तदुक्तं विषयेष्वपिलब्धेषु तदिच्छोपरमे सति अं
तर्मुखमनोवृत्तावानंदः प्रतिबिंबति स्मृतयश्च यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः यस्मिन्स्थितो न दुःखेन गुरुणा
पि विचाल्यते ये हि संस्पर्शजा भोगा दुःखयोनय एव ते आद्यंतवंतः कौंतेय न तेषु रमते बुध इति कादिशा इति श्रुतिश्चा
स्या ग्राम्यधर्मनिमित्तकानंदादेव भूतानि प्राणिनो जायंते उत्पद्यंते तेन विषयभोगादिनिमित्तकेनानंदेन जीवंति प्राप्नु
वंति तेषां प्राणिनां लयश्च तत्रैतस्मिन्सुषुप्तकाले नैव स्वस्वरूपभूते आनंद एव भवति सुषुप्तावानंदो यदि स्यात्केवलकस्यापि सुनु न
भवात् अतस्मात्सर्वेषामेव सर्वानुभवसिद्धत्वात् नात्र संशयोस्तीति भावः अन्यत्स्पष्टमिति दिक् नन्वस्तु सुषुप्तौ सुखानुभवस्त
थापि दुःखमहमस्वाप्सम् इति परामर्शेन दुःखानुभवोपि दुर्निवार इति चेन्नैव तदानीं दुःखसामग्र्यभावात् नहि जागरेपुत
लाभमृत्यौ विना दुःखमनुभूयते आकस्मिकत्वापत्तेः सुखस्य चात्मस्वरूपत्वेन नित्यत्वात् शय्यादेः समीचीनत्वे दुःखस्मृतिसु
प्रचारात्तत्तादृशप्रतीत्युपपत्तेः अस्तु वा अवस्थात्रयस्यापि त्रैविध्यं गौरीकारेण सुषुप्तावपि दुःखानुभवः तथाहि प्रमातृज्ञानजा
ग्रज्जाग्रत् शुक्तिरजतादिविभ्रमो जाग्रत्स्वप्नः भ्रमादिनाशबुद्धिभावो जाग्रत्सुषुप्तिः एवं स्वप्नमंत्रादिप्राप्तिः स्वप्नजाग्रत् ।
स्वप्नेपि मयाश्वप्नो दृष्ट इति स्वप्नस्वप्नः स्वप्नदशायां च यत्किंचिदनुभूय जाग्रद्दशायां च कथयितुं न शक्यते तत्स्वप्नसु
षुप्तिः एवं सुषुप्त्यवस्थायामपि सात्विकी सुखाकारा वृत्तिः सा सुषुप्तिजाग्रत् तदनंतरं दुःखमहमस्वाप्सम् इति परामर्शः तत्रैव
राजसी वृत्तिः सा सुषुप्तिस्वप्नः तदनंतरं दुःखमहमस्वाप्सम् इति परामर्शोपपत्तिः एवं तामसी वृत्तिः सुषुप्तिसुषुप्तिः तदनंतरं
गाढं मूढोहमस्वाप्सम् इति परामर्शः नन्वस्तु सुषुप्तिनिर्णयः पंचकोशानां स्वरूपमेव शरीरत्रयादतिरिक्तं न वा शरीरत्रया
भिमानिवत्पंचकोशाभिमानिनोपि संति न वेति चेत् शृणु अत्र स्थूलशरीराणां समष्टिव्यष्ट्यभिमानिचैतन्यं तन्मायापिं
डवत्तादात्म्यापन्नं वनवृक्षन्यायेन विराड्विश्व इत्युच्यते तयोस्तदुपाधित्वात् अयमेवान्नमयकोशः सर्वोयमन्नरसमयः पु श्च
रुष इति श्रुतेः एतानि स्थूलशरीराणि वक्ष्यमाणपंचीकरणरीत्या चतुर्विधानि भवंति जरायुजाऽण्डजस्वेदजोद्भिज्जभेदेन तत्र सत्वप्रधानं
देवशरीरं अयोनिजत्वात् तेजोमयत्वाद्वा रजःप्रधानं मनुष्यशरीरं सुखदुःखादिजनककर्मजन्यत्वात् तमःप्रधानं तिर्यगा
दिशरीरं अत्यंतजडत्वात् तथैव वक्ष्यमाणापंचीकृतपंचमहाभूतकार्यात्मकलिंगशरीराणां समष्टिव्यष्टिरेव प्राणमयम
नानि नोमयविज्ञानमयकोशा इत्युच्यते तदभिचैतन्यं तन्मायापिंडवत्तादात्म्यापन्नं हिरण्यगर्भः सूत्रात्मा चोच्यते व्यष्टिस्तु तैजसः
तत्कारणीभूतं तत्तु मायोपहितचैतन्यमात्मा सर्वज्ञानतत्कार्यसंस्काराणां समष्टिव्यष्ट्यभिमानीत मायापिंडवत्तादात्म्या
पन्नः आनंदमयकोश इत्युच्यते आनंदमयकोशोपाधित्वादानंदमयकोशः अत्राभिमानिनो ईश्वरप्राज्ञौ शुद्धसत्व

रामः ३

लिंगसत्वभेदेन एतेच विश्वतैजसप्राज्ञभेदा एकस्यैव चैतन्यस्यावस्थाभेदेन भवंति तथा च श्रुतिः बहिःप्रज्ञो विभुर्विश्वो ह्यंतःप्र
ज्ञस्तु तैजसः घनप्रज्ञस्तथा प्राज्ञ एक एव त्रिधा स्मृत इति साक्षीत्ववस्थात्रयोपहितः शरीरत्रयासंसर्गी तुर्याख्यः सर्वव्यव
हारस्यानुभवस्वरूप एकविध एवेति तदुपाधेरविद्याया एकरूपत्वादिति विवेकः तथा चावस्थात्रयावभासकत्वाद्द्रष्टव्यमात्मेति
तदुक्तं जाग्रत्स्वप्नसुषुप्तीनामागमापायिभासनं यतो भवत्यसावात्मा स्वप्रकाशश्चिदात्मकः इति श्रुतिश्च यत्र मानानि सिध्यंति
जाग्रदादित्रयं तथा भावाभावविभागश्च सब्रह्मास्मीति बाध्यते इति दिक् ननु स्थूलदेह एवात्मा न तु तदतिरिक्तसद्भावः स्थू
लोहं चेतन इत्यादिप्रतीत्या भूतचैतन्यवादिभिश्चार्वाकैः स्वीकारात् स च ध्वंसप्रागभावप्रतियोगी जातो देवदत्तो मृतो देवदत्त इत्या
दिप्रतीतेरिति चेन्मैवम् न स्वममकारास्पदत्वेनानात्मत्वात् प्राणवियोगकाले भूतचतुष्टयस्य विद्यमानत्वे चेतनोहमिति व्यव
हाराभावात् ध्वंसप्रागभावस्वीकारे कृतहान्यकृताभ्यागमप्रसंगाच्च न च देहपातपर्यंतं पश्यामीति प्रतीत्या मिलित्वा सर्वेंद्रि
ननु भिन्नित्यादिरूपसा मान्यज्ञानसाधनमेव इंद्रियं तल्लिंगप्रयोज नीयत्वात्प्रयोजनीय त्वज्ञानानुमनसेवरव मनसेंद्रियवत्
या एवात्मा भवंत्विति वाच्यं तेषामपि निर्विकल्पकज्ञानमात्रसाधनत्वात् ममकारास्पदत्वाच्च ननु तर्हि सविकल्पकज्ञा
नसाधनत्वादंतरिंद्रियं प्रतिनियतसंकल्पादिमत्त्वादंत्येंद्रियाद्यभावेपि सत्वान्मन एवात्मेति चेन्मैवम् गिरिगह्वराद्यवस्थितानां
योगिनां निर्विकल्पकसमाध्यभ्यासेन संकल्पविकल्पशून्यानां मनसोऽभावान्ममकारास्पदत्वस्य सर्वजनप्रसिद्धत्वाच्च नच
तर्हि तु प्राण एवात्मा योगिनां शरीरे सर्वदा विद्यमानत्वादिति वाच्यं तस्याचेतनत्वान्निरिछिन्नत्वाच्च पूर्ववन्ममकारास्पद
त्वाच्चानात्मत्वमिति दिक् ननु तर्हि प्राणाद्यतिरिक्तं क्षणिकं विज्ञानमेवात्मा बुद्धमुनिशिष्यैः सौत्रांतिकवैभाषिकयो
गाचारमाध्यमिकादिभिर्बौद्धैः स्वीकृतत्वात् तच्च विज्ञानं द्विविधं आलयविज्ञानप्रवृत्तिविज्ञानं च तत्राहमित्याकारकमाद्यं इदमि
त्याकारकं द्वितीयं क्षणिकत्वं च द्वितीयक्षणवृत्तिध्वंसप्रतियोगित्वमिति चेन्न तस्य कालांतरभाविभोगार्थप्रवृत्त्यनुपपत्तेः तु
ष्यतु दुर्जनन्यायेन यथाकथंचित्प्रवृत्तिसंभवेपि भोगासंभवात् तत्कर्मकर्तुर्विनाशितत्वात् कृतहान्यकृताभ्यागमप्रसंगाच्च
न च क्षणिकानां विज्ञानसंततीनां नाशेपि तद्वासनारूपसंतानेन भोगः संपादनीय इति वाच्यं संतानः किं संतान्यतिरिक्तमपि स्थिरं
क्षणिकं वा आद्ये यत्सत्तत्क्षणिकमिति सिद्धांतविरोधात् द्वितीये तु उक्तदोषापत्तिरिति दिक् अथात्मनः क्षणिकत्वासंभवेप्य
स्तु स्थिरत्वेन सावयवत्वं मध्यमपरिमाणवत्वं चार्हतानुयायिभिर्मुक्तवसनैः स्वीकृतत्वादिति चेन्न मध्यमपरिमाणवत्वे घटादिवदनित्य
त त्वप्रसंगात् न चास्तु तर्हि नित्याणुरिति तदेकदेशिमतमिति वाच्यं अणुत्वस्वीकारे हि सकलदेहव्याप्त्यभावे युगपन्नानावयवा
वच्छिन्नसुखादिसमवायाभावेन प्रत्यक्षविरुद्धत्वापत्तेः अस्तु तर्हि तु मध्यमपरिमाणवत्वे न घटस्य संभवे परममहत्परिमाण दिवदनित्यत्व
वत्वेन विभुरेवात्मा विभुत्वं तु सर्वमूर्तद्रव्यसंयोगित्वं मूर्तत्वं परिच्छिन्नपरिमाणवत्वं तच्च पृथ्व्यप्तेजोवायुमनःस्वेव अमूर्तत्वं त्वा

काशादिचतुष्टये स चाहं जानामि घटमिति प्रतीत्या ज्ञानाश्रय एव न तु ज्ञानस्वरूपः अहं ज्ञानमिति प्रतीत्यभावात् ज्ञानाभिन्न
त्वादेव जडस्य स पुनः प्रतिशरीरं भिन्नः अन्यथा बंधमोक्षादिकं सुखदुःखादिव्यवस्थासिद्धेः तथाहि एकस्य न तत्वदर्शनेन कुत्रापि
संसारो नोपलभ्येत एकस्य सकलसाधने सिद्धे सर्वे विमुक्ताः स्युरिति तार्किकवैशेषिकप्राभाकरादिभिः स्वीकृतत्वादिति
चेदुच्यते नानात्मवादो दुर्निरूपः युक्तिविरोधात् श्रुतिविरोधाच्च तथाहि एकस्य पुरुषस्य सुखादिसामग्र्या उत्पद्यमानसु
खादिकं सर्वैर्नानुभूयते सर्वेषां जीवानां विभुत्वेन सर्वशरीरान्तर्भावाविशेषात् न च यस्य कार्यकारणसंघातस्यैव सुखादि
नान्यस्येति वाच्यं तस्यापि सर्वात्मसन्निधौ उत्पद्यमानस्य विशेषहेतोरभावात् कथमेकात्मसंबंधि विभुत्वेन च यत्कर्मदश
शरीरसंबंधे तत्रैवेति नियम इति शंक्यं कर्मणोपि देहेंद्रियव्यापारद्वारा उत्पद्यमानस्य सर्वात्मसन्निधौ सर्वात्मसंबंधावि
शेषात् न च देहेंद्रियव्यापारस्य साधारणत्वेपि विजातीयात्ममनःसंबंधस्यासाधारणत्वमिति वाच्यं विजातीयमनःसंबंधस्यापि
सर्वात्मत्वाविशेषात् अथ स्वकीयमनःसंबंधो भेदनियामक इति नो चेद्वाच्यम् सर्वदा सर्वात्मसंयुक्तं मनः कस्य चिदेव नान्यस्ये
ति वक्तुमशक्यत्वादित्यादिक् किं चात्मनः केवलमात्मनानात्वमेव युक्तमुत किं तु गुणगुणिभावोपि तथाहि ज्ञानात्मनोर्गुणगु
णिभावः किं तादात्म्येन समवायेन वा नाद्यः तवमतेनांगीकारात् न द्वितीयः असंभवात् तथाहि समवायोपि संबंधान्तरेण तत्र
संबद्धः उत नासंबद्धः आद्ये कथं नानवस्था द्वितीये तत्सिद्धिः न च समवायस्य समवायान्तराभावेपि संबंधेनैव गुणगुणिभाव इति
वाच्यं स्वरूपसंबंधोपि किं समवायादतिरिक्तः तत्स्वरूपो वा आद्ये तत्राप्यनवस्था द्वितीये स्वेनस्वीयमिति अननुभवेनाबाधः
स्वयमेवाश्रयविषयत्वे आत्माश्रयश्च एवमानंदादिष्वपि बोध्यं श्रुतिविरोधस्यानंदसाधने सर्वमेव दर्शितत्वात् अग्रेपि दर्श
नीयत्वाच्च तस्माद्विनात्मनानात्वस्वीकारेपि न सुखदुःखादिबंधमोक्षादिव्यवस्थासिद्धिरिति एतेन शेदमल्लन्यायेन सांख्य
पातंजलभाट्टमतमपि प्रत्युक्तं आत्मनानात्वस्वीकाराविशेषात् कथंचिदुपपादने च सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयं
ब्रह्मेत्यादिश्रुत्यनुरोधात् लाघवाच्च नित्यशुद्धबुद्धमुक्तस्वभावात्मैकत्वमंगीकर्तव्यं अथाद्वैतवादेपि कथं सुखदुःखादिव्यव
स्थेति चेच्छृणु सुखदुःखाद्याश्रयीभूतानां करणभेदाद्वा अविद्याभेदाद्वा सर्वव्यवस्थासिद्धिरिति सर्वमेव दर्शितत्वात् ।
तथा च श्रुतिः कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव सुस्फुटयत्कार्यकारणयोरभेदात्
आत्मनस्तु अक्रियीत्वेन निर्गुणत्वाच्च तथा च श्रुतिः निर्गुणं निष्कलं शांतं निरवद्यं निरंजनं एको देवः सर्वभूतेषु गूढः
सर्वव्यापी सर्वभूतांतरात्मा एतेन ज्ञानाधिकरणत्वं निरस्तं विस्तरस्तु स्वरूपनिर्णये नु संधेय इति दिक् इति श्रीसदानंदवि
रचिते स्वरूपप्रकाशे इतरमतदर्शननिराकरणपूर्वकं शरीरत्रयविवेकात्प्रत्यगात्मतत्त्वप्रकाशो नाम प्रथमः परिच्छेदः ॥१॥

ॐ ननु कथमवस्थानीतस्य स्वप्रकाशज्ञानस्वरूपस्यात्मनो ज्ञानामीत्यादिप्रतीत्याश्रयत्वमिति चेदुच्यते अंतःकरणरूपो
पाधिवशात् तथाहि शरीरमध्ये सर्वशरीरव्यापकं देहमात्रं सूक्ष्मं पंचभूतारब्धमंतःकरणद्रव्यं सत्वप्राधान्यात् स्वच्छं नेत्रा
धर्माधर्मादिवार णापवोषितिर दिद्वारा निर्गत्य योग्यान्घटादिविषयान्व्याप्य तत्तदाकारं भवति द्रुतताम्रादिवत् तस्य च सौरालोकादिवत् झटित्येव संकोचविका
शशालित्वं तत्र सामग्रीवशात् चक्षुरादिद्वारा निर्गत्य देहाभ्यंतरे घटादौ दंडायमानं तिष्ठति तत्र देहावच्छिन्नांतःकरणभागो
हंकार इत्युच्यते तत्प्रतिबिंबितं तदवच्छिन्नं वा चैतन्यं प्रमातेत्युच्यते कर्तृत्वं तु क्रियानुकूलेंद्रियसंयोगादिव्याप
रवत्त्वं प्रमातृत्वं शरीरमध्यभागावच्छिन्नवृत्तिस्वरूपत्वं देहघटादिमध्यवर्तिदंडायमानस्तु भागो वृत्तिर्ज्ञानाख्या क्रियेत्युच्यते।
तत्प्रतिबिंबितं तदवच्छिन्नं वा चैतन्यं प्रमाणं विषयव्यापकस्तु भागो विषयस्य ज्ञानकर्मत्वसंपादकमभिव्यक्तियोग्यत्वमित्युच्यते
तत्प्रतिबिंबितं तदवच्छिन्नं वा चैतन्यं प्रमितिरिति प्रमेयं तु विषयगतं ब्रह्मचैतन्यमेव तदेव ज्ञानेन फलं फलं नाम भग्नावरणचि सादि
त्संबंधः तत्र चायं प्रकारः एकस्मिन्नंतःकरणपरिणामे जाते घटावच्छिन्नचैतन्यमंतःकरणचैतन्यं च एकलोलीभावापन्नं भव
ति ततो घटावच्छिन्नचैतन्यं प्रमात्रभेदात् स्वाज्ञाननाशाय स्फोरितं भवति घटं च स्वावच्छेदकं स्वतादात्म्याध्यासाद्भासयति अंतःक
रणपरिणामस्य घटस्याप्याधानात्तु वृत्तिः स्वावच्छिन्नेन चैतन्येन भासयते इत्यंतःकरणवृत्तिः घटानामभिव्यक्ता तदाकारत्वं यमहं जा
नामि घटमिति अत्र भासकचैतन्यस्यैकत्वेपि घटस्फुरितेरस्यपदत्वात्स्फुरितता अंतःकरणवृत्तिप्रतितिस्तु स्वपदत्वात्स्फुरितेति
संक्षेपः अपरोक्षत्वं तु अज्ञानविषयतास्वरूपयोग्यत्वे विषयता च वित्तेस्संबंधः तदतिरिक्तानंतरमानाभावात् संबंधस्य च वता
आकाशानीलिमा संबंधवत् ई त्त्वात् संभवति आध्यात्मिकत्वेन व्यवहारः तदपि द्विविधं अर्थापरोक्ष्यं ज्ञानापरोक्ष्यं भेदेन तत्राद्यं तत्तदर्थस्य व्यवहारानुकूलचैतन्या उ सादि
भेदः द्वितीयं तु तत्तद्व्यवहारानुकूलचैतन्यस्य तत्तदर्थाभेदः न चापरोक्षार्थविषयकत्वं ज्ञानापरोक्ष्यमिति शंक्यं स्वरूपसुखापरोक्ष्य
रूपस्वरूपज्ञाने व्याप्तिप्रसंगात् स्वव्यवहारे स्वातिरिक्तसंविद्विषयत्वस्वीकारे स्वप्रकाशत्वहानिविरोधात् अत एव सुखादिप्रकाश
रूपस्यादिरहितस्वरूपसुखप्रकाशरूपे चैतन्येप्यपरोक्षं परिभाषाकारमते तु प्रमाणचैतन्यविषयावच्छिन्नचैतन्याभेदो ज्ञानापरोक्ष्यं
विषयस्य प्रमात्रभिन्नत्वं तु विषयापरोक्ष्यं प्रमात्रभेदोपि न तावदैक्यं किंतु प्रमातृसत्तातिरिक्तसत्ताकत्वाभावत्वमिति अतिव्याप्त्यादिकं तु
तत्रैव चिंतनीयमिति दिक् ननु एकेन घटादिज्ञानेन एकाज्ञाने नाशिते सद्यो मुक्तिप्रसंगः अज्ञानस्यैकत्वात् तथा च श्रुतिः अजा
मेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः जनयंतीं स्वरूपाः इति न एवं मायाभिः पुरुरूप ईयत इत्यादिश्रुत्या अज्ञानस्य नानात्वश्र
वणादिति वाच्यं नानाज्ञानपक्षे एकस्य जीवस्य कान्ताज्ञानोपाधित्वादिति चेन्न उत्तेजकमणिवत् स्वविरोधिभिः स्वांगीकारात् आवर राग
णत्वं नाम मतिभात्यपि वस्तुनि नास्ति न भातीति प्रतीतिजननं अभिभवश्च प्रतीतिनिरोधः नाशः अतीतविद्यमानमप्यविद्यमानसम

म.

स्व. प्र. ५

मेव न चैवं ब्रह्मज्ञानेनाप्यविद्याया अनिवृत्तेरनिर्मोक्षप्रसंग इति शंक्यं तत्त्वमस्यादिमहावाक्यार्थज्ञानस्यैवाधिष्ठानाज्ञातार्थविषय
कत्वेन प्रामाण्याङ्गीकारात् प्रत्यक्षादिप्रमाणानां तु बाधितार्थविषयकत्वेन भ्रमत्वेऽप्यबाधव्यवहारसौकर्यार्थं व्यावहारिकप्रामाण्यस्वीका
५व३ रात् नाज्ञाननिवर्तकत्वं किंतु भिमाचत्वं अथवा मूलाज्ञानस्यैवावस्थाज्ञानानि घटादिविषयावरणानि तेषां ज्ञानप्रागभावस्था
नीयत्वेन यावन्ति ज्ञानानि तावन्त्यज्ञानानीत्यभ्युपगमात् तथा चैकेन ज्ञानेनैकस्य पल्लवाज्ञानस्य नाशेऽपि न मुक्तिप्रसंगः मूलाज्ञा
नस्य विद्यमानत्वात् ननु नानापल्लवाज्ञानपक्षे एकया वृत्त्या सर्वेषामज्ञानानां नाश इत्येकस्य घटादेः पुनः कदाप्यप्रकाशेन।
स्यात् अन्यवृत्तिकालेऽपि प्रकाशेन स्यात् एकावरणस्य निवृत्तावप्यावरणान्तरस्यानिवृत्तेरिति चेदुच्यते एकया वृत्त्या एकाज्ञानेना
शितेऽपि तद्विषयावरणान्तराणां प्रतिरुद्धत्वात् यावत्तानि तिष्ठन्ति तावदप्रकाशः तस्मादपगतायां पुनरप्रकाशश्चोपपद्यत इति इमानि
ज्ञानानि मूलाज्ञानवदनादीनीति एके जायन्त इत्यन्ये तदुक्तं परिमलकृद्भिः स्थितं तत्र लेशो व्यावहारिको जगज्जीवो बाह्यस्याप्ये
जगज्जीवो विविधतीति निद्रा तावदावरणविक्षेपशक्तियोगादज्ञानावस्थाभेदरूपा तथास्य सुप्तस्यावस्था पुनः करणादौ विलीने स्वरव
मस्वापनकिंचिदवेदिषमिति परामर्शान्मूलाज्ञानवत्सुषुप्तिकालेऽनुभूयमानाज्ञानावस्थाभेदरूपैव तथा स्वप्नजाग्रज्जागरप्रदक
घटाद्यज्ञानं सादि इति भावः घटादयस्तु मूलाज्ञानजन्या इति विवेकः मीपरमे सत्येवोद्भवात्सादित्वमिति तदनन्यदप्यज्ञानं सादीति अथवा मूलाज्ञानवत्पल्लवाज्ञानान्यप्यनादीनि तदपः अत्र च य
स्मिन्प्रदेशेऽन्तःकरणतत्संस्कारावच्छिन्नो जीवः यस्मिन्प्रदेशे सर्वगतोऽसंगोऽविद्याप्रतिबिम्बितो जीवस्तत्रोभयत्रापि प्रमातृचैतन्योपरा
गार्थवृत्तिः ब्रह्मचैतन्याश्रयणभूतार्थवस्तुमात्रमहावाक्यजन्यान्तःकरणवृत्तिः न चास्मिन्प्रदेशेऽन्तःकरणसंबन्धस्य धर्मादेरपि भानस
भवतीति शंक्यं अयोग्यत्वात् इष्टापत्तेर्नत्वेऽपि जीवप्रत्यक्षत्वाच्च अस्मिन्पक्षे आत्मधर्मत्वात्सुखादिवद्धर्मादिप्रत्यक्ष
स्य दुर्वारत्वात् अत्र पक्षेऽपि ब्रह्मणैव जगदुपादानत्वे यस्मिन्प्रदेशेऽविद्यावच्छिन्नः सर्वगतो जीव आहत्य तस्मिन्प्रदेशे जीवस्यैव जग
दुपादानत्वेनावरणभंगार्थवृत्तिः सुखादौ तु आवरणाभावेऽन्यहत्यसाक्षात्कारेऽपि तदवच्छिन्नचित एव ज्ञानत्वादिति विवेकः ननु भव सादिरणः
त्वपरोक्षवृत्त्यावरणनाशोऽभिभवो वा तथापि परोक्षवृत्त्याऽज्ञानं निवर्तते न वा आद्ये आप्तवचनात् दूरस्थवृक्षे परिविशेषावगमेऽपि मारा
तद्विपरीतपरिमाणज्ञानं न स्यात् द्वितीये तु वृत्तिवैयर्थ्यात् अत्रोक्तं परिमलकृद्भिः द्विविधं विषयावरकमज्ञानं एकं विषयाश्रित
रज्ज्वादिनिष्ठमसदापादिविक्षेपापादानमभानापादकं कार्यकल्प्यं अन्यदसत्त्वापादकं पुरुषाश्रितविषयमहं न जानामीत्यनुभावि
कं पुरुषाश्रयस्य विषयसंभिन्नविक्षेपापादनत्वासंभवेन विषयाश्रितत्वस्य च विषयमहं न जानामीति सादितिरूपप्रकाशसंस
र्गायोगेन द्विविधस्याप्यावरणकत्वात् तथा च परोक्षस्थले वृत्तिनिर्गमाभावान्न दूरस्थवृक्षे आप्तवाक्यात्परिमाणविशेषावगमे
पि तद्विपरीतपरिमाणदर्शनाच्च विषयगताज्ञाननिवृत्तावपि पुरुषगताज्ञाननिवृत्तिरस्त्येव शास्त्राधीनजानामीत्यनुभूता
ज्ञानस्य तदुपदेशानन्तरं निवृत्त्यनुभवात् अनन्तवानुमितेऽपि वाक्यादौ नास्तीति मनीषमनुदयात् किन्तु कीदृश इति संशयः। ग्रम्मः ५

तदुक्तं परोक्षज्ञानतो नश्येदसत्त्वावृत्तिहेतुता अपरोक्षधियानश्येदभानावृत्तिहेतुतेति दिक् तस्मान्निर्धर्मकस्य स्वप्रकाश
ज्ञानस्वरूपस्यात्मनो न करणो[illegible]पाधिवशाज्ज्ञानामीत्यादिव्यवहारोऽत्र यत्किंचिदसमंजसमिति प्रतिकर्मव्य
पः वस्था ॥ ननु भवत्वेवं जीवस्य व्यवहारस्तथाप्यवस्थात्रयभासको जीवादतिरिक्तोऽसंगोदासीनोऽयं साक्षी किं ब्रह्मकोटिः किं वेश्व
भिन्न रकोटिः यद्वा तदुभयकोटिः उत जीवकोटिरिति चेत् मतभेदेन कोटिचतुष्टयमपि प्रमाणमेव तथाहि तत्र शुक्तिकल्पितरजता
यथेदं रजतमिति भ्रमस्थले वस्तुतः शुक्तिकोटिरजतोपीदमंशः प्रतिभासतो रजतकोटिः तथा ब्रह्मकोटिरेव साक्षी प्र
तिभासतो जीवकोटिरिति जीवस्य सुखदुःखव्यवहारे तस्योपयोगः प्रतिपादित इति तत्त्वप्रदीपिकाकृन्मतं मायाशब
लेसगुणे परमेश्वरे केवलो निर्गुणश्च इति विशेषणानुपपत्तेः सर्वप्रत्यगभेदेन विभुत्वेन च जीवाभेदेन श्रुतिपादितत्वमिति कौमु
दीकारास्तु वर्तिकानुसारेण एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा कर्माध्यक्षः सर्वभूताधिवासः साक्षी
चेता केवलो निर्गुणश्चेति देवतादिश्रुतेः परमेश्वरस्यैव रूपभेदः कश्चिज्जीवप्रवृत्तिनिर्धारोऽनुमानान्यस्वयमुदासीनः सा
क्षी नाम स चाहंकारणलादिधर्मानास्पदत्वादपरोक्षो जीवगतमत्तानाद्यवभासश्च जीवस्यान्तरंगं वर्णितं तत उभयभिन्नस्तु यं
कूटस्थदीपे देहद्वयाधिष्ठानभूतकूटस्थचैतन्यस्याविकारकस्य देहद्वयस्य साक्षितादीतराणां निर्विकारत्वाच्च साक्षीत्युच्यते लोकेऽपि
उदासीनत्वे बोधमात्रे च साक्षित्वप्रसिद्धेः यद्यपि जीवस्यान्तःकरणतः सति देहद्वयभासकत्वं तथापि नश्वरत्वात् कालेऽसहकार्यभावे कूटस्थ
चैतन्यमेवावभासते अतएवाहंकारादीनां सर्वत्रप्रकाशसंसर्गोऽस्त्येव शय्याद्यंगाचरत्वे अप्रमाज्ञानकालीनाहंकारस्यैतावन्तं का
स्य लमिदमरूपं स्वप्नं वा मम मितत्वानुसंधानं च न च कूटस्थप्रकाशनेकत्वे जीवस्य व्यवहारस्यैकत्वादिकमिति वाच्यं अन्यान्याध्यासे
न जीवसंकल्पत्वापत्तौ कूटस्थस्य जीवान्तरगतत्वात् न च जीवचैतन्यमेव साक्षी प्रभवतु किं कूटस्थेनेति वाच्यं लौकिकवैदिक
व्यवहारकर्तुस्तस्योदासीनत्वद्रष्टृत्वासंभवेन साक्षी चेता केवलो निर्गुणश्चेति श्रुतिसूचितसाक्षित्वायोगात् तयोरन्यः पिप्पलं
स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीतीति कर्मफलभोक्तृजीवादुदासीनप्रकाशरूपसाक्षिणः पृथग्गतत्वाच्च तदुक्तं नाटकदीपे
नृत्यशालास्थितो दीपः प्रभुं सभ्यांश्च नर्तकीं दीपयेदविशेषेण तदभावेऽपि दीप्यते १ अहंकारं धियं साक्षी विषयानपि भासयेत्
अहंकाराद्यभावेऽपि स्वयं भात्येव पूर्ववत् २ निरंतरं भासमाने कूटस्थे ज्ञप्तिरूपतः तेन भासा भासमानेयं बुद्धिर्नृत्यत्यनेकधा ३ अहं
कारः प्रभुः सभ्या विषया नर्तकी मतिः तालादिधारीण्यक्षाणि दीपः साक्ष्यवभासकः ४ स्वस्थानसंस्थितो दीपः सर्वतो भासयेद्य
था स्थिरः स्थायी तथा साक्षी बहिरन्तः प्रकाशयेत् ५ बहिरन्तर्विभागोऽयं देहापेक्षो न साक्षिणि विषया बाह्यदेशस्था देहस्यान्त
रहंकृतिः ६ इति एवं जीवादिवैचित्र्यं साक्षी न ब्रह्मकोटिः किं त्वस्य जीवेश्वराविभागचैतन्यमिति दिक् एकजीववादिनस्तु

नवेश्वरकोटिः १

अविद्योपाधिकत्वमात्राद्दृश्यत्वात्साक्षी लोके विषयकर्तृत्वे सति द्रष्टृत्वं साक्षित्वं प्रसिद्धं तथा संगोदासीनप्रकाशरूपे जीव एव सम्भ
वतीति जीव एवान्तःकरणतादात्म्यापन्नः कर्ता भोक्ता चेत्स्वयमुदासीनत्वात् साक्षी देव इति मन्त्रस्तु बलनगीदाभिप्रायेण
साक्षित्वप्रतिपादकः तत्स्वरूपमेतिमन्त्रस्तु गुहाधिकरणन्यायेन जीवोभयपरः गुहाधिकरणभाष्ये ... अनेन रह
स्यब्राह्मणव्याख्या तेन प्रकारेण जीवो नान्तःकरणभयाभिप्रायेण निनकश्चिद्विरोध इति वदन्ति तदेकदेशिनस्तु भवतु जी
व एव साक्षी किन्तु न सर्वगतत्वरूपेण पुरुषान्तरगतान्तःकरणादीनपि पुरुषान्तरं प्रति स्वान्तःकरणभासकसाक्षिसर्गावच्छेदेन प्र
काशत्वापत्तेः नचान्तःकरणभेदेन प्रमातृभेदात्तदनापत्तिः साक्षिभास्यान्तःकरणादौ सर्वत्र साक्ष्यभेदे सति प्रमातृभेदस्याप्रयो
जकत्वात् तस्मादन्तःकरणोपहितः साक्षी जीव एव तथा च प्रति पुरुषं साक्षिभेदात् पुरुषान्तरान्तःकरणादेः पुरुषान्तरसा
क्ष्यसंबन्धात् तदप्रकाशे उपपद्यते सुषुप्तावपि सूक्ष्मरूपेणान्तःकरणसद्भावात्तदुपहितः साक्षी तदा
स्त्येव ननु अन्तःकरणोपहितस्य प्रमातृत्वेन तस्य साक्षित्वे सुषुप्तौ च प्रमात्रभावेपि साक्षिसत्त्वेन न तयोर्भेदस्यावश्यं वक्त
व्यत्वात् न तत्र स भवतीति चेत् उच्यते विशेषणोपाध्योर्भेदस्य सिद्धान्तसम्मतत्वेनान्तःकरणविशिष्टः प्रमातान्तरुपहितः
साक्षीति भेदोपपत्तेः विशेषणत्वं इतरव्यावर्तकत्वे सति विशेष्यान्वयित्वमुपाधि
त्वं यथा घटकं घटं पश्य कर्णशष्कुल्यादिच श्रोत्रेन्द्रियादेरिति वदन्ति ननु तद्रूपस्य साक्षिणश्चैतन्यमात्रावरकेनाज्ञानेनावृत
त्वात्कथमावृतेनाविद्यादिकार्यादिभानं तदभावे चैतन्यमात्रावरकाज्ञानमिति सिद्धान्तविरोधः तदुक्तं वार्त्तिके यत्प्रसादाद्विद्यादि ८
स्फुरत्येव दिवानिशं तमप्यपह्नुते विद्या नाज्ञानं साक्षिदुष्करं इति चेत्सत्यम् अविद्यावृतत्वादृते तत्प्रकाशाप्रकाशे पितृ केचित्
अयमविद्यान्तःकरणतद्धर्माव भासकं चैतन्यं विलयेवाज्ञानेनैव न तस्य मारणोतीत्यनुभवानुसारेण कल्पनान्न कश्चिद्दोषः अत क
एव सर्वदा तस्यामनावृतत्वादेव प्रकाशस्य सर्गादेस्तानविपरीतत्वात्तानेन सत्यादृग्गोचरत्वं ननु साक्षि चेतनस्यानावृतत्वेन स्व
रूपभूतस्यानन्दस्य प्रकाशापत्तिरितिचेदिष्टापत्तेः आनन्दरूपप्रकाशो प्रत्युक्तस्यात्मनि निरुपाधिप्रेमगोदर्शनात् तदुक्तं
वार्तिके वित्तात्पुत्रः प्रियः पुत्रात्पिंडः पिंडात्तथेन्द्रियम् इन्द्रियेभ्यः परः प्राणः प्राणादात्मा परः प्रियः इति भासत एव परम
प्रेमास्पदत्वलक्षणमुखमिति विवरणाच्च इति साक्षिप्रकरणम् अथ दृष्टिसृष्टिवादमवलम्ब्य कृत्स्नस्यापि प्रपञ्चस्य नात्रा =५ दृष्टिसमसमया स्थितिसिद्धिः
तसत्त्वं कल्प्यते मानाभावात् तथाहि अज्ञानतत्प्रयुक्तं दृश्यं प्रातीतिकं स्वप्नवत् यदा यदा विद्यते तदा तदैव साक्षिस्वरूपेण
जीवेन प्रकाश्यते ननु तत्रावरणतद्‌जनकमनोवृत्तिर्विकल्प्यते गौरवात् ननु दृष्टिसृष्टिमते कृत्स्नस्य जाग्रत्प्रपञ्चस्य कल्पि
तत्वाभ्युपगमे कः कल्पकः निरुपाधिरात्मा ऽविद्योपहितो वा नाद्यः मोक्षेपि साधनान्तरनिरपेक्षतस्य सत्वेन संसारापत्तिः २१
न द्वितीयः अविद्याया अपि कल्पनीयत्वेन तत्कल्पनात्प्राक् कल्पनाभावात् अत्रोच्यते सर्वं पूर्वकल्पिताविद्योपहितः

अविद्योपहितस्यैव कल्पकत्वात् २

चिदुपराग ... स्यभंगा ... तिमतद्वय ... स्यपदे ३

रामः ६

उत्तरोत्तरा विद्याकल्पकः कल्पककल्पनाप्रवाहस्य अनादित्वं प्रथमत्वाच्च नानवस्थादोषः ननु विद्याया अनादित्वांगीकारे शुक्तिरजता
दिवत्कल्पितत्वं न युज्यते अयात्मनि सामान्यरूपेण सर्वाध्याससंभवेन साधनविभागानुपपत्तिरिति चेन्न यथा स्वप्ने कल्प्यमानगो
पुत्रादिकं किंचित्सर्वसिद्धत्वेन किंचित्तदानीमुत्पद्यमानत्वेन कल्प्यते एवं जागरेपि विभागोपपत्तेः अथवा दृष्टिरेव सृष्टिः दृश्यस्य दृष्टि
भेदे मानाभावात् तदुक्तं ज्ञानस्वरूपमेवाहुर्जगदेतद्विचक्षणाः अर्थस्वरूपं भ्राम्यन्तः पश्यन्त्यन्ये कुदृष्टय इति केचित्तु केशाचिन्मतेन वस्तु
तोऽनाद्येवाऽविद्यादिषट्कं तत्र दृष्टिसृष्टिर्नोपेयते किंतु ततोन्यत्र प्रपंचमात्रे अविद्यादिषट्कं तु जीव ईशो विशुद्धा चित् विभागस्त
तयोर्द्वयोः अविद्या तच्चितोर्योगः षडस्माकमनादय इति ननु तर्हि श्रुतिस्मृतिसिद्धस्य सृष्टिप्रलयादेः कः कल्पक इति चेदत्र समाहितप
रिमलकृद्भिः न कोपि कल्पकः किमालम्बनात्ताकाशः संभूत इति श्रुतिर्निष्प्रपंचब्रह्मात्मैक्यावलम्बनेति अवेहि अध्यारोपापवादाभ्यां
निष्प्रपंचब्रह्मप्रतिपत्तिर्भवतीति तत्प्रतिपत्त्युपायतया श्रुतिषु सृष्टिप्रलयोपन्यासः न तात्पर्यमस्तीति हि भाष्यादिघोषः तदुक्तं वार्तिके
अवाक्तत्वात् जगतो नाद्वयत्वं विहन्यते द्वयं प्रमज्ञानजत्वेन नवस्तु स्वप्नद्वयवत् १ नासतो जन्मनायोगः सतः सत्त्वाच्च चेष्यते कूटस्थे वि
क्रिया नास्ति तस्मादज्ञानतो जनिः २ वास्तवीन्त्विमां कुर्वंतेवर्षी सृष्टिकारणं प्रधानं परमाणवादिः प्रवर्तकमपेक्षते ३ तन्न्यवनेकईशो
ऽपीकेन प्रवर्त्यते लीनत्वात्कामकर्मादि न प्रवर्तयितुं क्षमं शक्तिर्नियामिका चेत्सा केनान्येन नियम्यते अविचारितरम्यातः सृष्टिरात्म
निकल्पिता ५ तथाप्येकात्मबोधाय श्रुत्या सृष्टिरुदीर्यते कुम्भारोऽत्ययमन्दानां सृष्टौ दृष्टान्त उच्यते ६ अचेतनोऽपि यथा तन्तून् ऊर्णनाभेः सचेत
नात् जातं चिदात्मनस्तद्वत् प्राणलोकादचेतनं ७ मिति ननु तर्हि तात्पर्याभावे वियत्प्राणादयो वियदादिसर्गतत्क्रमादिश्रुतीनां परस्प
रविरोधपरिहाराय प्रलय इति चेन्न न्यायस्तु तत्पर्यतात्पर्यमभ्युपेत्य तत्प्रवृत्तेः उक्तं च शास्त्रदर्पणकृद्भिः श्रुतीनां स्थितात्पर्येस्याहत्य दर्शि
त इति ब्रह्मात्मैक्यपरत्वाच्च नासां तत्रैव विघ्नत इति विस्तरस्त्वाकरे इति दृष्टिवादः ननु दृष्टिसृष्टिवादे सृष्टिशेषादेव प्रपंचस्य कल्पितत्वेन मि
थ्याभूतस्य कथमर्थक्रियाकारित्वमिति चेत् स्वप्नवदभ्युपगमात् अपि स्वाप्नजलादिसाध्यावगाहनादिरूपार्थक्रियाऽसत्या भवतु नाम
कथं जाग्रदनुभूयमानाऽसत्येति चेत् स्वसमानसत्ताकार्थक्रियाकारित्वेन साम्यात् प्रतिपादितं चैतद्वार्तिके सर्वेन्द्रियवियोगेपि स्व
विदुःखित्वमात्मनः स्वप्ने दृष्टं मनःसंगः चात्मनस्तात्त्विको भवेत् १ मैवं मृषात्वात्तत्प्रसंगस्य मनोमात्रविजृम्भणात् बाह्येन्द्रियवियोगेपि
न मनो लुप्यते तदा २ महाराजादयः स्वप्ने स्वप्नानुभवगोचराः नवा भवा इति ज्ञेयाः शयानेभ्यः पृथक्त्वतः ३ गृहे शय्यानायेदृष्टास्तेनु स्व
प्नैव न गताः जाग्रद्दृष्टमृषा स्वप्ने स्वप्नस्य जागरे मृषा ४ अन्योन्यव्यभिचारित्वात् स्वप्नजाग्रदवस्थयोः मिथ्यात्वमित्यसंदिग्धः स्वप्नश्रुत्याभि
वर्णितः ५ इति युक्ततरं च यथा जागरे घटादिप्रकाशनक्षमतेजस्तदुरूपान्तरनिरीक्ष्यमाणलोकवत् स्वप्नेपि केषांचित् प्रविष्टेन कल्पितस्य सं
तमसस्य प्रसिद्धसत्तमसा विनार्थकारित्वं दृष्टं तेन तमसि घटाद्यावरणं दीपाद्यानयनेन तदपसरणं तत्त्वयनेपुनरावरणमित्यादेर

श्री

स्व॰ प्र॰ ७

अनुभवसिद्धत्वाच्च किंच स्वप्नांगनादिजनितस्य सुखभयादेर्जागरेप्यनुवृत्तिदर्शनाच्च अन्यथानुकूलप्रतिकूलस्वप्नयो रागद्वेषौ न स्तः अनु-
मानं च ब्रह्मान्यन्मिथ्या दृश्यत्वात् परिच्छिन्नत्वात् जडत्वाच्च शुक्तिरजतादिवत् ननु शुक्त्यादौ रजतमित्यादिभ्रमस्थले देशान्तरस्थरजत-
स्यैव दुष्टेन्द्रियसन्निकर्षेण ज्ञानलक्षणया भासोपपत्तावनिर्वचनीयरजतोत्पत्तिकल्पने गौरवं तथा चान्यथाख्यातिसंभवेन । नु । दृष्टान्ता-
सिद्ध्याऽनुमानस्यासंभव इति चेन्न मैवम् अनिर्वचनीयख्यात्यनभ्युपगमे बाधकाराऽसंभवेन सर्वेषां वादिनां भ्रमबाधयोर्वैयधिकरण्या-
पत्तेः तथा हि दोषसहकृतेनेन्द्रियेण विप्रकृष्टस्यैव रजतस्य पुरोवस्थितत्वेन ग्रहणं नतरं बाधे सति तत्र रजतमिति न त्वत्रेति तदाका- बाधा५
रः स्यात् अख्यातिवादेऽपि असंसर्गाग्रहादनुभवस्मरणात्मकस्य ज्ञानद्वयस्येदं रजतमिति भेदाग्रहः असंसर्गाग्रहाद्वा भवस्म-
रणात्मकस्य ज्ञानद्वयस्य रजतमिति बाधाकारः स्यात् आत्मख्यातौ च आन्तरे विज्ञानाकारे बहिष्ठमध्यस्यन इति तद्बाधेपि आन्तर-
बाध रजतं न बहिरिति तदाकारः स्यादिति असत्ख्यातौ तु भ्रमकालेपि भानासंभवः असतः प्रमाणागोचरत्वात् तस्मान्न दृष्टान्तासंभवा-
दनुमानासंभव इति दिक् पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वान्न पक्षैकदेशे दृष्टान्ते सिद्धसाधनदोषः तार्किकादिभिरपि स्वीकृ-
तत्वात् ब्रह्मणि बाधवारणाय ब्रह्मान्यदिति पक्षविशेषणं दृश्यत्वं च चिद्विषयत्वं स्वव्यवहारे स्वातिरिक्तसंविदपेक्षत्वं वा मिथ्यात्वं च सद्वि-
म लक्षणत्वे सत्यसद्विलक्षणत्वं सत्त्वं च कालत्रयाबाध्यत्वं असत्त्वं च कालत्रयेपि सत्त्वेन प्रतीत्यनर्हत्वं स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वं मि-
थ्यात्वं वा ज्ञाननिवर्त्यत्वं अनिर्वाच्यत्वं वा ननु किमिदमनिर्वाच्यत्वं किं निरुक्तिविरहः तन्निमित्तज्ञानविरहो वा तन्निमित्ता-
र्थविरहो वा नाद्यः अनिर्वाच्य इत्यनेनैव निरुक्त्या व्याघातात् न द्वितीयः निरुक्तिरूपफलसत्त्वेन तन्निमित्तविरहस्य वक्तुमश-
क्यत्वात् अत एव न तृतीयः अर्थस्यापि वक्तुं शक्यत्वेन तन्निमित्तार्थविरहाभावाच्च नापि सद्विलक्षणत्वे सत्यसद्विलक्षणत्वस-
दसद्रूपत्वे नानुपपन्नेरिति चेन्नैवम् सद्विलक्षणत्वे सत्यसद्विलक्षणत्वे सति सदसद्विलक्षणत्वमनिर्वाच्यत्वमित्यनेनैव निरु-
क्त्या व्याघातादृत्यपास्तम् अलीकवादिनं तु प्रति अलीकभिन्नत्वे सति सत्तादात्म्यशून्यत्वं ननु तादृशे ब्रह्मणि किंचित्प्रमाणमस्ति
न वा आद्ये स्वप्रकाशत्वहानिः प्रमाणविषयत्वेन घटादिवत् दृश्यत्वेन मिथ्यात्वापत्तेश्च द्वितीयेऽलीकत्वापत्तिः शास्त्रारंभवैयर्थ्याप-
त्तिश्च तथा च जितं शून्यवादिनेति केचित् नैवं शंकनीयं निर्विकल्पस्वप्रकाशज्ञानस्वरूपसाक्षिरूपस्य ब्रह्मणः सर्वप्रमाणप्रका-
शकत्वेन तदपेक्षायाऽसंभवात् नहि दीपस्य दीपान्तरापेक्षास्ति नहि वाह्यानां सूर्यादीनामाभ्यन्तराणां बुद्ध्यादिकरणानां चाचेतनत्वेना-
त्मप्रकाशं विना प्रकाशः संभवत्यनुभवविरोधात् तस्य स्वप्रकाशत्वानभ्युपगमे च जगदान्ध्यप्रसंगात् तथा च श्रुतयः न तत्र सूर्यो भा-
ति न चंद्रतारकं नेमा विद्युतो भांति कुतोयमग्निः तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति । निर्विकल्पमनंतं च हेतुदृ-
ष्टांतवर्जितं अप्रमेयमनादिं च यज्ज्ञात्वा मुच्यते बुधः २ एकधैवानुद्रष्टव्यमेतदप्रमेयं ध्रुवमित्याद्याः अप्रमय अप्रमेय एतेनाद्य-

रामः ७

बोधस्य नान्यबोधस्त्वाबोधरूपतयात्मनः
दीपस्य नान्यदीपस्त्वा यथा स्वात्मप्रकाशने
इत्यभियुक्तोक्तेः ४२

यद्यज्ज्ञानं तत्तदात्मवि-
षयमिति नियमात्
हि निर्विषयं ज्ञानं भव-
ति ८ =

नहि सर्वथा निरूपणावह-
ति भ्रमः किंतु केनापि कि-
... तु ... न देशे
मानमिति ९ =

यत्र नसा व्यायाति
तदेव वा वादति
तिवाक्यात् शब्दवि-
न्यासान्तर्गतं तन्निमि-
त्तभूतमानाभिधानं
धानरूपं ज्ञानं भव-
ति ११

कार्यं सकर्तृकं कार्यत्वात् घटवदिति तार्किकाद्यनुमानगम्यत्वमपि निरस्तं तथा चैतादृशस्यात्मनो लीकत्वापादनमेवालीकम्
न च तर्हि सकर्तृकशास्त्रारम्भवैयर्थ्यमिति वाच्यम् आत्मनः स्वप्रकाशत्वेन शास्त्रारम्भानपेक्षत्वेऽपि कल्पिताज्ञानतत्कार्यविरोधिक
ल्पितवृत्तिविशेषार्थं शास्त्रारम्भस्यावश्यकत्वात् तस्य चाग्रे वक्ष्यमाणत्वात् कल्पितस्यैव कल्पितविरोधित्वात् यक्षानुरूपो बलि
रिति न्यायात् तथा चैकमेवाद्वितीयं सत्यं ज्ञानमनन्तं ब्रह्मेत्यादि शास्त्रमेव स्वप्रमेयानुरोधेन स्वस्यापि कल्पितत्वमापादयति।
अन्यथा स्वप्रामाण्यानुपपत्तेः एतेन शब्दगम्यस्य ब्रह्मणः सत्यत्वं शब्दयोग्यतया शब्दधीप्रामाण्यं चाद्वैतागमप्रतिपत्त्युप
स्योपजीव्यत्वाच्छेच सत्यत्वं वक्तव्यमिति निरस्तं शब्दार्थयोग्यतादीनां समानसत्ताकत्वनियमस्य निःप्रमाणकत्वात् घटज्ञानस्य
मारणस्य संक्षेपः किं च भगवत्पादैरात्मनः स्वप्रकाशकत्वं युक्तितोऽपि प्रतिपादितम् तथाहि संशयविपर्ययव्यतिरेकप्रमाणानां
अन्यतममपि नास्ति तत्र तद्विरोधि ज्ञानमिति सर्वज्ञदृष्टं अन्यथा वृत्तियाम्यनमापत्तेः आत्मनि चाहं वा न वेति न कस्यचित्संशयः
नापि नाहमिति विपर्ययः व्यतिरेकप्रमा वेति तथा च तत्स्वरूपप्रमा सर्वदास्तीति वक्तव्यं तस्य सर्वसंशयविपर्ययधर्मित्वात् धर्मां
शे सर्वमभ्रान्तं प्रकारे तु विपर्यय इति न्यायात् तदुक्तं प्रमाणमप्रमाणं च प्रमाभासस्तथैव च कुर्वन्त्येव प्रमां यत्र तदसंभावना कृत
इति कृतमधिकेनेति दिक् इति श्रीसदानन्दविरचिते स्वरूपप्रकाशे सपरिवारत्वंपदार्थप्रकाशनं नाम द्वितीयः परिच्छेदः ॥२॥ परिच्छे
दद्वये तावत्त्वंपदार्थप्रकाशनं कृतमद्य च वाक्यस्य तत्पदार्थः प्रकाश्यते। ननु शरीराद्यतिरिक्तनित्यशुद्धबुद्धत्वंपदार्थप्रकाशने
नैवाज्ञाननिवृत्तिः संभवति किं तत्पदार्थनिर्णयप्रयासेनेति चेत् मैवं तत्पदार्थप्रकाशनं विना वक्ष्यमाणतत्त्वमस्यादिमहावाक्या
र्थासंभवात् न हि पदार्थज्ञानं विना वाक्यार्थज्ञानं संभवतीति न वा तदभावे अज्ञानतत्कार्यनिवृत्तिः ब्रह्मणि परोक्षत्वभ्रमस्याविघ्नमा
नत्वात् तथा च वाक्यार्थप्रकाशनार्थं तत्पदार्थः संक्षेपेण प्रकाश्यते तत्र हि कः पदार्थ आत्मा नित्यशुद्धबुद्धमुक्तस्वभावः पारमार्थिक
एक एव सर्वदा एकरूपोऽपि औपाधिकभेदेन त्रिधा विभज्यते ईशो जीवः साक्षी चेति तत्र कारणोपाधिभूतविचित्रानन्तशक्तिघटमा
नघटनापटीयसी मायोपहितविवेचैतन्यमीश्वरः तथा च श्रुतयः मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं अपाणिपादो जवनो ग्र
हीता पश्यत्यचक्षुः स शृणोत्यकर्णः न तस्य कार्यं करणं च विद्यते परास्य शक्तिर्विविधैव श्रूयते जवनः पादकार्यकारी ग्रहीता हस्तकार्यकारी
कार्यं शरीरं करणमिन्द्रियमित्यर्थः आकाशशरीरं ब्रह्मेति आकाशस्तल्लिङ्गादिति न्यायाच्च आकाशोऽत्राव्याकृतं उक्तं च भगवत्
पादैः स च भगवाञ्ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः सदा संपन्न इति सदा यावत्कालस्थायी सोऽपि त्रिविधः स्वोपाधिभूतमायागुणत्रय
भेदेन ब्रह्मविष्णुरुद्रभेदात् तत्र कार्योन्मुखरजउपहितो ब्रह्मा स्रष्टा हिरण्यगर्भः स महाभूतकारणभावान्न ब्रह्मा तथापि स्थू
लभूतोत्पादकत्वात् विराडुपचर्यते तदुक्तं हिरण्यगर्भो नाम मूर्तित्रयादन्यः प्रथमो जीवः स एव शरीरी प्रथमः स एव पुरुष उच्यते

आदिकर्त्ता भूतानां ब्रह्माग्रे समवर्त्तत हिरण्यगर्भः समवर्त्तताग्रे इत्यादिश्रुतेश्च कारणीभूतसत्वगुणावच्छिन्न उपहितो वा विष्णुः पालयि
ता कारणीभूततमउपहितो रुद्रः संहर्त्ता एवमेकस्यैव चतुर्मुखचतुर्भुजपंचमुखाद्याः पुमाकाराः श्रीभवानीभारत्याद्याः स्त्र्याकाराः ।
स्व॰ अन्ये च मत्स्यकूर्माद्यो लीलयैवाविर्भवन्ति वस्तुतस्तु न स्त्री न पुमान्न षंढः तथा च श्वेताश्वतरोपनिषदि नैव स्त्री न पुमानेष नैव चा
प्र॰ तेन यं न पुंसकः यद्यच्छरीरमादत्ते तेन तेन स युज्यत इति गजेन्द्रेणाप्युक्तं सवै देवासुरमर्त्यतिर्यङ् न स्त्री न षंढो न पुमान्न जंतुः न वै गुणः कर्म यो
८ न सन्न चासन्निषेधशेषो जयतादशेषः तथा च श्रुतिः अथ यो ह खलु वावास्य तामसोंशोसौ ब्रह्मचारिणो योयं रुद्रः अथ यो ह ख
लु वावास्य राजसोंशोसौ ब्रह्मचारिणो योयं ब्रह्मा अथ यो ह खलु वावास्य सात्विकोंशोसौ ब्रह्मचारिणो योयं विष्णुः अत्र दीपि
कायां ख्या तामसस्तमप्रधानोंशस्तदुपाधिको विशेषः हे ब्रह्मचारिण एवमग्रेपि एवं भवान्यादीनामप्याश्वलायनशाखायां मांज्ञानम
नुसंधेयं उक्तं च पद्मपुराणे यं वेदान्तविदो वदन्ति मुनयो योगिभिर्गम्यते स ब्रह्मा यदि वाहनो यदि हरिर्योसौ सततस्मै नमः बृहन्नारदीये
हरिरूपी महादेवो लिंगरूपी जनार्दनः ईषदप्यन्तरं नास्ति भेदकृन्नरकं व्रजेत् एक एव त्रिधा भिन्नः एकोप्येकादशा श्रुतिः एक एवाहमस्मि
ये एक एव जगन्मय इत्यादिस्कंदवचनाच्चेति एवमत्र प्रक्रिया जीवेश्वरजगद्विभागस्य नित्यशुद्धबुद्धमुक्तस्वभावे आत्मन्यध्यस्ता
नादिमायासत्वप्राधान्येन स्वच्छादर्पणस्थमुखाभाससचिदाभासं गृह्णाति ततश्च विंबस्थानीयः परमेश्वरः उपाधिदोषानास्कंदितः ।
प्रतिविंबस्थानीयश्च जीवः उपाधिदोषास्कंदितः ईश्वराच्च जीवभोगाय वक्ष्यमाणाकाशादिक्रमेण शरीरेंद्रियसंघातस्तज्जोगश्च
कल्पः प्रपंचो जायते विंबप्रतिविंबमुखानुगतमुखवच्च ईशजीवानुगतं मायोपाधिचैतन्यं साक्षीति कल्प्यते अत एव मानमेयादिप्रक्रि
याविनैव स्वाध्यस्तमायात्कार्यं च कृत्स्नं तेन प्रकाश्यते यद्यपि मायाप्रतिविंब एक एव तथापि अविद्यागतानामंतःकरणानां भिन्न
त्वात्तद्भेदेनांतःकरणोपाधेस्तस्याश्च भेदव्यपदेशात्जीवभेदव्यपदेशः अविद्याभेदाद्देववाभेदः ते च जीवा विंबभूतेश्वरैक्यसाक्षात्का
रं विना मायां निवर्त्तयितुमसमर्था एव अखिलानर्थरूपं संसारं सरन्ति साक्षात्कारश्च वक्ष्यमाणमहावाक्यजन्यया निर्विकल्पकवृत्ति
वेचनानर्हशुद्धचिदाकारत्व[illegible]धर्मविशिष्टयानेकजन्मार्जितसुकृतफलभूतया निदिध्यासनपरिपाकप्रसूतया सर्वाज्ञानन
त्कार्यविरोधिन्या चेतो हृत्या भवति तथा च श्रुतयः तमेव विदित्वा[illegible]तिमृत्युमेति नान्यः पंथा विद्यतेऽयनाय आत्मेत्येवोपासीत
तदात्मानमेवावेत् तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मण इति दैवीह्येषा गुणमयी मम माया दुरत्यया मामेव ये प्रपद्यन्ते मायामेतां
तरंति ते इति भगवद्वचनाच्च एतेन ननु तब्रह्मणामहज्जीवस्यैक्यं संभवतीति ब्रह्मण एवमज्ञाबाभावात् तथाहि नास्ति सर्वज्ञ
त्वादिविशिष्टं ब्रह्म आम्नायस्य क्रियापरत्वेन तत्र तात्पर्याभावादिति कर्ममीमांसकाः प्रधानमचेतनमेव जगत्कारणमिति
सांख्याः असति नित्यज्ञानादिमान् पृथिव्यादिकार्यानुमितः स च जीवाद्भिन्न एवेति तार्किका वैशेषिकाश्च पशुपतिरेव जग
त्कारणं सचेतनोपि जीवाद्भिन्नस्तदुपास्य इति पाशुपताः भगवान्वासुदेव एव जगत्कारणं तस्मादुत्पद्यते संकर्षणाख्यो जीवः ।

तस्मान्मनः प्रद्युम्नः तस्मादनिरुद्धोऽहंकारः तेन कार्यत्वाज्जीवस्य तेन सहनानात्वं नाभेद इति पांचरात्रिकाः तत्र लौकिकं विज्ञानं सर्वज्ञा
मिति सौगताः परिणामी नित्यः सर्वज्ञोऽभिन्नाभिन्न इति जैनास्तदितरस्य क्लेशकर्मविपाकादिरहितः ज्ञानस्वरूप। प्रधानांश सत्वगु
ण प्रतिफलित तया सर्वज्ञ इति पातंजला इत्यादिपक्षे प्रथमपरिच्छेदे ध्यात्मभेदस्य निराकृतत्वाच्च विस्तरस्तु स्वरूपनिर्णये नुसंधेयः
सा पुनरस्मिन्नोहनिरंजनमायानियंतुरनेककोटिब्रह्माण्डनायकानां ब्रह्मविष्ण्वादीनामपि नायकस्यैव परमयाभक्त्याभवति ननु केयं भक्तिः
कस्य पुनर्भक्त इति चेच्छृणु तत्र भक्तिर्नाम भजनं भज सेवायामिति स्मरणात् तच्च कायेन मनसा वाचा वा नित्यान्वेषीभजनीयस्य क
स्यचित्तुष्टिहेतुर्यो व्यापारो भजमानपुरुषनिष्ठः सा च नवविधा श्रवणकीर्तनादिभेदेन तदुक्तं प्रह्लादेन हिरण्यकशिपुं प्रति श्रवणं
कीर्तनं विष्णोः स्मरणं पादसेवनं अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनं १ इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा क्रियते भगव
त्यद्धा तन्मन्येऽधीतमुत्तमम् इति भगवति सर्वात्मकत्वेन पुत्रभार्यादिरूपेण स्वस्वरूपेण च परमप्रेमास्पदे आत्मनि च सर्वेषां जीवा
नां सदा भूयासमिति प्रेमदर्शनात् अर्पिता शास्त्रज्ञानान्सर्वमपि विद्यमानाभक्तिर्यदि स्यात् तदधीनेन श्रद्धा साक्षादेव नवलक्ष
णा क्रियेत तदधीतमुत्तमं मन्ये इत्यर्थः तच्च वदस्योत्तरवाक्यत्वान्नयव्यापेक्षा श्रवणादिस्वरूपज्ञानस्य श्रेयानस्य कीर्तनीया
दिगुणग्रामज्ञानस्य श्रवणादिकर्तव्यताज्ञानस्य च शास्त्राधीनत्वात् ननु श्रवणादेः किं स्वरूपमिति चेदुच्यते सगुणस्य निर्गुण
स्य वा भगवत्प्रतिपादकस्य वाक्यस्य श्रवणेन ग्रहणं श्रवणं तच्च सगुणस्य प्रीतिकरं साधारणोऽपि द्विजनस्तादृशेन स्त्रीयं श्रवणेन गुणा
प्रीणाति तदुक्तं प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रिय इति तादृशज्ञानरूपस्य श्रवणस्य कीर्तनहेतुत्वात् तदुत्तरं तदाह कीर्त
नं सगुणस्य निर्गुणस्य वा वाचकस्य शब्दस्य मुखेनोच्चारणं तत्राद्यस्य प्रीतिकरत्वं द्वितीयस्यापि प्रणवाद्युच्चारणस्य प्रीतिकरत्वेन
भाष्यादावुक्तत्वात् अशक्नुवन्भावयितुं वाक्यमेव समभ्यसेत् इत्याचार्योक्तेश्च तदुत्तरं च श्रवणकीर्तनाभ्यामनुभूतस्य भगवतः
स्मरणं सम्भवतीति स्मरणमुक्तं तच्च शब्दकरणकत्वाज्ञानस्य प्रीतिकरत्वं स्पष्टं पादसेवनादिकं तु गुणग्रामस्मरणाधीनमतः स्मर
र णानन्तरमुक्तं तच्च परमेश्वरप्रतिमासंबंधिगृहमार्जनलेपनादिरूपं अथवा अविद्यो वा सविद्यो वा ब्राह्मणो मामकी तनुः इति वच
नाद्गुरुदेहस्य ब्राह्मणस्य पादसेवनादि भगवद्भक्तदेहस्य वा परमहंसादिरूपस्य सर्ववर्णाश्रमपूज्यत्वात् तथा च स्मृतिः वासु
देवस्य द्वे रूपे चलं चाचलमेव च चलं संन्यासिनां रूपमचलं प्रतिमादिकं १ सुखज्ञानामयं धर्मो यद्धि स्याल्लिंगधारणं वाङ्कुजातो
ह्यज्ञानानां नायं धर्मः प्रशस्यते इति ब्राह्मणेतरेण तु ब्राह्मणेनरस्य प्रेमभक्तस्य पादसेवनं कर्तव्यमेवेति न कश्चिद्विरोधः गृह
लेपनादिरूपपादसेवने कृते पाद्यादिसमर्पणरूपमर्चनमभिलषतीति पादसेवनोत्तरमर्चनमुक्तं तच्च पंचोपचारादिरूपं पं
चोपचारादिसाधनकेऽर्चने चिरमभिनिविशमानो भक्तः आलोचयति किमस्याखिललोकनाथानामपि नाथस्य परमसात्वि
कमुनिगणैर्मनसार्च्यमानस्य मादृशेन वराकेणार्चनेन ततोऽर्चनाभिनिवेशात्पश्चाद्वन्दनमेव कायिकादिषु निविशतेऽतोऽर्चनोत्तरं

स॰ प्र॰ ९

वंदनमुक्तं तच्च प्रजावहिर्भूतनमस्कारः प्रतिमादौ दास्यं दासस्येव परमेश्वरप्रीतिफलकसकलकर्मानुष्ठानं यत्करोषि यदश्ना
सि यज्जुहोसि ददासि यदित्यादि भगवदुक्तं तच्च त्रिविधं पापक्षयमुद्दिश्य भगवत्प्रीतिमुद्दिश्य किमप्यनुद्दिश्य वा तदुक्तं कपिले
वा२ न देवहूतिं प्रति कर्मनिर्हारमुद्दिश्य परस्मिन्वा तदर्पणं यजेद्यष्टव्यमिति वा पृथग्भावः स सात्त्विक इति कर्मनिर्हारं पापनाशनं
परस्मै परमेश्वराय यष्टव्यं भगवदाज्ञारूपेण वेदेन कर्तव्यतया बोधितमिति मत्वैव न तु किमप्युद्दिश्येत्यर्थः एवं त्रिविधु
भावयुक्तः उत्तममध्यमादिभेदेन त्रिविधः सात्त्विक इत्यर्थः ननु पापक्षयरूपस्वर्गतफलकामेन क्रियमाणस्य कर्मणो दास्यरूपत्वे
दि स्वर्गादिकामेन क्रियमाणानामपि तथात्वं स्यादिति चेन्न पापस्येश्वराज्ञोल्लंघनजनकत्वेन तत्क्षयकामेन क्रियमाणस्यापि दास्यत्वोचितत्वात्
अपराधिनो हि प्रभुं प्रति दासमाचरन्तोऽपराधान्मुच्यन्त इति लोके दृष्टं ननु प्रभोः कोपहेतुर्व्यापारोऽपराध इति लोके व्यवहारः न
पापजनकस्य निषिद्धाचरणस्यापराधत्वे तथात्वं स्यादिति चेत् भवत्वेवं फलमतउपपत्तेरित्यधिकरणे भगवता वादरा
कैः यणेन विहितनिषिद्धयोरीश्वरप्रसादकोपजनकत्वोक्तेः न च तथापि पापनाशफलकक्रियाया ईश्वरप्रीतिफलकत्वासंभव इति
वाच्यं कर्तुः सुखदायकेश्वरप्रीतिफलकक्रियाया एव दास्यभक्तित्वात् तदुक्तं प्रह्लादेन यस्त्वाशिष आशास्ते न स भृत्यः स वै
वणिक् आशिषः स्वर्गादिसुखानि आशास्ते इच्छति भृत्यः दासः एवं च कर्तृनिष्ठसुखफलकक्रियाया राजसत्वाभावे भक्ति
त्वेनोक्तत्वाद्दर्शनमध्ये निवेशो बोध्यः तदुक्तं तत्रैव कपिलेन विषयानभिसंधाय यश ऐश्वर्यमेव वा अर्चादावर्चयेद्यो मां पृ स
थग्भावः स राजस इति राजसत्रयं एवमभिसंधाय हिंसां दंभं मात्सर्यमेव वा संरंभी भिन्नदृग्भावं मयि कुर्यात्स तामस इति तामस
त्रयं संरंभी क्रोधी अत एव स्वकर्मणा तमभ्यर्च्येति गीतोक्तिः न चैवं पापनाशमुद्दिश्य कृतश्रवणादिकमपि दास्यं स्यादिति वा
च्यं दास्यलक्षणे श्रवणादिभिन्नत्वस्य निवेशात् मातापित्रादीनां देवबुद्ध्या दासवत् शुश्रूषणमपि दास्यं बोध्यं अथवा श्रव
णादिलक्षणानां क्वचिन्मेलनेऽपि न दोषः एकस्या अपि सात्त्विकादिभेदेनानेकत्वं भक्तेः सख्यं प्रेमविशेषरूपं यथा सख्यौ प्रेम
तथा भगवति यथा चोपादेयं भक्ष्यादिकं प्राप्तं सख्यै निवेदयते प्रेमविशेष[illegible]सर्वं तथा भगवति यथा सख्युर्दूषणादिकं परेण
क्रियमाणं सोढुं न शक्नोति तथा भगवति यथायं मद्दिष्टं साधयिष्यत्येवेति विश्वासेन सख्युरनुवृत्तिः क्रियते तथा भगवति एतन्मा
त्रिप्रेमविशेषघटितस्य चिरानुष्ठितनिष्कामक्रियारूपदास्याधीनचित्तशुद्ध्यधीनत्वात् दास्योत्तमुक्तिः आत्मनिवेदनं स्वस्या र
त्मनो निवेदनं यथा विक्रीतस्य गवादेर्योगक्षेमचिन्ताया मनभिनिवेशः तथात्मीयायां अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहमिति भगवदुक्तं प्रतिसंधाय सदा विष्णुरेव चिन्त्य इत्यर्थः यद्वा विष्णुस्वरूपे सच्चिदानंद
२व घने सख्याभेदेन साक्षात्कार आत्मनिवेदनं एतस्या भक्तेरुक्तविष्ण्वादिरूपसख्याधीनत्वेन तदुत्तरमुक्तिः अत्रेदं विवेचनीयं
श्रवणादीनां सगुणनिर्गुणविषयकत्वं यामकीर्तनानां साधनभक्तित्वमेव सख्यस्य साधनसाध्योभयविधभक्तित्वं प्रेममात्रस्य

गलितोदेर्भक्ति पादाम्बुजात्स्य २८ रामः ६

संतःसारवस्य

साधनत्वेपि परमकाष्ठापन्नप्रेम्णः सगुणनिर्गुणविषयकश्रवणादिसाध्यत्वात् तदुक्तं विष्णुपुराणे प्रह्लादविष्णुसंवादे याप्री
तिरविवेकीनां विषयेष्वनपायिनी त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु इति अनपायिनी अव्यभिचारिणी त्वामनुस्मरतः त्व
दीयश्रवणकीर्त्तनादिकुर्वतः सा तादृशी तादृशस्य सगुणविषयकप्रेम्णो निर्गुणश्रवणादिसहितस्य चरमात्मनिवेदनरूपा
ब्रह्मात्मैक्यसाक्षात्काररूपज्ञानलक्षणाभक्तिः फलं यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महा
त्मन इति श्रुतेः मयि चानन्ययोगेन भक्तिरव्यभिचारिणीति गीतोक्तेः तादृशप्रेमरूपचरमभक्तेर्ज्ञानसाधनत्वोक्तेः चकारेण
पूर्वोक्तस्यामानित्वमदंभित्वमित्यादिसाधनसमूहस्य समुच्चयः भागवतेप्युक्तं मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये मनोग
तिरविच्छिन्ना यथा गंगाम्भसोऽम्बुधौ १ लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतं अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे र
श्रुतिमात्रेण उपस्थितिमात्रेण गुणोपस्थितिनिरूपेणाकारणेन तत्कार्यस्योक्तप्रेम्णो ग्रहः तस्यैव निर्गुणाभक्तिचरमसाधनत्वात्
वि सर्वगुहाशये सर्वदृश्याधिष्ठानभूते अविच्छिन्ना सर्वस्मिन्वस्तुरवत्याकारेतियावत् मनोगतिर्मनोवृत्तिः यथा गंगाम्भः पर्वतप्रस्रवादिसमुद्रभा
गेष्वासु चतुर्ष्वपि न गच्छती समुद्रभागेषु सर्वेषु संबध्यते तथा मनोवृत्तिरपि सकलदृश्यावच्छिन्नेषु सद्भागेषु संबध्यते ब्रह्माण्डस्यान्तर्बहि
श्च सर्वविषयेष्ववेति सर्वानुस्यूततया सर्वदृश्याधिष्ठानत्वं क्रमेण जायत इत्यर्थः स्वरूपलक्षणमाह लक्षणमिति अहैतुकी
फलानुसंधानशून्या नहि ज्ञानस्य फलमस्ति तस्य सकलदृश्यविरोधितया मोक्षप्रतिबंधकत्वमात्रस्वीकारात् अव्यवहिता ऽहमे
व विष्णुरिति स्वाभेदेन क्रियमाणा अत एव बृहन्नारदीयादावुक्तम् अहमेव परो विष्णुर्मत्तः सर्वमिदं जगत् इति यः सततं पश्येत्तं वि
द्यादुत्तमोत्तमं विष्णुपुराणेप्युक्तं सकलमिदमहं च वासुदेवः परमपुमान्परमेश्वरः स एकः इति मतिरचला भवत्यनन्ते हृदयगते
व्रज तान्विहाय दूरात् १ एवमेकमिदं वृत्त्वा न विभेदसकलं जगत् वासुदेवाभिधानस्य स्वरूपं परमात्मनः २ तदेतदुपदिष्टं ते संक्षेपेण
महामुने परमार्थसारभूतं यत्तदेतन्मशेषतः ३ तद्भावभावनापन्नस्ततोसौ परमात्मना भवत्यभेदी भेदश्च तस्याज्ञानकृतो भवेत् ४
इत्यादि एतेन शार्कराक्षिजिनोशिवेति वैष्णवव्याख्यानामपसारः अपास्तः सच ब्रह्मसाक्षात्कारहेतुः परमप्रेमा त्रिधा तस्यैवाहं ममैवा
एवं चर्वयंगलिता दिहृत्पततीयंस चत नायस्य ५ वासौ स एवाहमिति त्रिधा भगवद्भक्तिरसायनस्यास्याध्यनाभ्यासपाकत इति स एवाहमिति फलावस्थापि समकक्षतया ज्ञा साधनस्य प्रेम्णा
एव साध्यरूपापत्तानतिभेदात् वस्तुतस्तु तादृशप्रेमरूपसर्वभक्तेः फलमात्मनिवेदनमेवोक्तप्रायेति विधत्वेनोक्तं तत्राद्यं तस्यैवा
स्मीति मित्राद्याकारत्वात्स्वीयपालनादिस्नेहेन विष्णुचिन्तारूपं द्वितीयं तु प्रेमातिशयेन तत्रजीवादिदेहनतिरोधाना त्वममैवासौ सर्व
इत्याद्याकारं तृतीयं तु सेव्यसेवकभावादिभेदस्यापि तिरोधानात् सच्चिदानन्दघनमात्रस्वरूपविष्णुप्रेमरूपमिति विवेकः तस्य परमप्रेम्णः
साधनरूपा श्रवणादिभक्तिस्तत्साध्यात्मनिवेदनपर्यन्ता नवविधापि पूर्वोक्ता नमसात्विकादिभेदेन काशीति भेदा भवतीति शिवम्

संयोगस्य विनियोजकस्य विधिना कस्य पृथक्त्वं अर्थान्तरप्रतिपादकत्वे =१२=

तस्माद्भगवद्भक्तिं विना तत्त्वज्ञानेन न सिध्यतीति मुमुक्षुणा भक्तौ महान् प्रयत्नः कर्त्तव्य इति एतेन कर्मकाण्डस्यापि ज्ञानहेतुत्वं सिद्धं दास्यभक्तौ कर्मकाण्डान्तर्भूतत्वात् सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यत इति भगवद्वचनाच्च मनुनाप्युक्तं यथोक्तान्यपि कर्माणि परिहाय द्विजोत्तमः आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान् १ एतद्धि जन्मसाफल्यं ब्राह्मणस्य विशेषतः प्राप्यैतत्कृतकृत्यो हि द्विजो भवति नान्यथेति १ ननु तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेनेति श्रुत्या वेदानुवचनशब्दोपलक्षितस्य ब्रह्मचारिधर्मस्य यज्ञदानशब्दाभ्यामुपलक्षितस्य गृहस्थधर्मस्य तपोनाशकशब्दाभ्यामुपलक्षितस्य वानप्रस्थधर्मस्य नित्यस्य नित्यनैवहितेन पापक्षयद्वारेण ज्ञानार्थत्वबोधने न च विविदिषा इति विनियोगवैयर्थ्यं ज्ञानमुत्पद्यते ऽसात्त्वयात्यापस्य कर्मणा इति वाच्यं विनियोगाभावे हि मुमुक्षोरपि नित्यकर्मानुष्ठाने ज्ञानं स्याद्वा न स्यात् सति तु विनियोगे ज्ञानमवश्यं भवेदेवेति नियमार्थत्वात् तस्माद्विध्यानामेव कर्मणां वेदने विविदिषायां वा विनियोगस्य श्रुत्या बोधितत्वात्कथमुक्तं सर्वं कर्म ज्ञाने परिसमाप्यत इति चेन्न तत्राप्येव सर्वेषां काम्यनित्यसाधारणानां च प्रतिपदोक्तफलत्यागपूर्वकमन्तःकरणशुद्ध्यर्थं तया विविदिषासंयोगेनानुष्ठानं भवति यथा खादिरो यूपो भवति खादिरं वीर्यकामस्य यूपं कुर्वीतेत्यत्र एकस्य खादिरत्वस्य क्रतुप्रकरणपाठात् फलसंयोगाच्च क्रत्वर्थत्वं पुरुषार्थत्वं च प्रमाणभेदादङ्गीक्रियते तथाग्निहोत्रेष्टिपशुसोमानां सर्वेषामपि शातपथपठितानां स्वोत्पत्तिविधिसिद्धानां तत्तत्फलसंयोगः प्रत्येकवाक्येन क्रियते एकस्योभयत्वे तु संयोगपृथक्त्वन्यायात् विनियोजकभागो वेदस्य शातपथः विनियोज्यभागः संहिता कर्ममार्गबोधको विधिः स्वोत्पत्तिविधिरित्यर्थः तस्मात्काम्यान्यपि फलाभिसंधिमत्त्वात् अन्तःकरणशुद्धये कर्तुं शक्यन्ते तत्राग्निहोत्रादिकर्मणां स्वतः काम्यत्वनित्यत्वरूपो विशेषोऽस्ति किन्तु पुरुषाभिप्रायभेदकृत एव फलाभिसंधित्यागेन कृतः सः तदुक्तं वार्त्तिककृद्भिः वेदानुवचनादीनामैक्यात्मज्ञानजन्मने तमेतमिति वाक्येन संयोगस्य पृथक्त्वत इति दिक् इति श्रीसदानन्दविरचिते स्वरूपप्रकाशे तत्त्वज्ञानसाधनत्वेन भगवद्भक्तितत्साधनविहितकर्मनिरूपणपूर्वकं भगवत्तत्त्वनिरूपणेन तत्पदार्थप्रकाशनं नाम तृतीयः परिच्छेदः ॥३॥ परिच्छेदत्रयेण प्राक् दृक्पदार्थः प्रकाशितः अनेन तु परिच्छेदेन दृश्यं सम्यक् प्रकाश्यते १ तथाहि दृश्यं त्रिविधं अव्याकृतामूर्तमूर्त्तभेदात् तत्र माया माऽविद्या चैतन्यतादात्म्यापन्ना ऽमूर्त्तमूर्त्तप्रपंचबीजरूपा भवति न च जीवईशो विभागाविहि भागश्च तयोर्द्वयोः अज्ञानतत्कृतो योगः षडस्माकमनादय इत्यादिषट्कस्य तद्भिन्नत्वेन कथं सर्वप्रपंचबीजत्वमिति वाच्यं तद्भिन्नत्वेपि तन्निरूपितत्वानिरूपितत्वाभ्युपगमेन तदनतिरेकात् सा च स्वयमचेतनापि चैतन्येनोज्ज्वलिता सर्वजीवकर्मप्रयुक्तसंस्कारवती शब्दस्पर्शरूपरसगन्धात्मकान्याकाशवायुतेजोजलपृथिव्याख्यानि पंचमहाभूतानि जनयति अजामेकामित्यादिश्रुतेः न च कालोकाशादीनामनादित्वात्कथमुत्पत्तिर्वाच्यं कल्पादावुत्पन्नस्याकाशस्याऽकल्पस्थायित्वेन तथा प्रतीतेः प्रवाहानादित्वस्य सत्त्वाच्च तथा च श्रुतिः एतस्मादात्मन आकाशः संभूत आकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवीत्यादि आकाशस्यैव दिग्व्यवहार

अविद्यानिरूपितत्वं तदन्यानिरूपितत्वाभ्युपगमेन=५

अविद्याभिन्नत्वेपि ५=

रामः
१

स्वीकारात् अविद्याचित्संबंधस्वरूपकालस्य स्वमते ईश्वरानतिरेकात् एवमविद्या न एवांधकारोपि भावरूप एव आवरणात्मकत्वा
त्कषत्ज्ञानविरोधी आलोकनाश्यः झटिति विद्युदादिवदाविर्भवति तिरोभवति चेति स्वमते सिद्धांतः संसारदेहोपादानत्वाभावाच्च न स्मृ हेतु
तिषु सृष्टिप्रक्रियायामज्ञानमित्यविरोधः तथाचायमेवाव्याकृतपदार्थ ईश्वरोपाधिः तानि च सूक्ष्माण्यपंचीकृतानि पंच महाभूतानि
अमूर्ताख्यानि कारणैक्यात् सत्वरजस्तमोगुणात्मकानि सत्वांशप्राधान्येन ज्ञानशक्त्यात्मक क्रियाशक्त्यात्मके मोहशक्त्यात्मके च
जीवोपाधिभूते एक स्वच्छस्य विचित्ररूपमिव मिलित्वा जायते तथाच श्रुतिः तस्मान्नोऽसृजदित्यादि तस्य च ज्ञानशक्तिप्रधानां
न शोंतःकरणं तच्च बुद्धिर्मन इति तद्बुद्धिरपि द्विविधा चित्ताहंकारभेदेन क्रियाशक्तिप्रधानांशः प्राणः स च पंचधा प्राणापानव्यानस
सा मानोदानभेदात् मोहशक्तिप्रधानोंस्तु निशलस्यादि एवमेकैकभूतेभ्यो ज्ञानक्रियाशक्तिभेदात् प्रत्येकमिंद्रियद्वयं जायते आका
शाच्छ्रोत्रवाचौ वायोस्त्वक्पाणी तेजसश्चक्षुःपादौ अप्सो रसनापायू पृथिव्या घ्राणोपस्थौ चेति एतेषामधिष्ठातारो देवा अपि ज्ञा
नक्रियाभेदात् दिगग्नी वातेन्द्रौ आदित्यविष्णू वरुणमित्रौ अश्विप्रजापती शब्दस्पर्शरूपरसगंधग्राहकानि श्रोत्रत्वक्चक्षुरसनघ्रा
णाख्यानि पंच ज्ञानेन्द्रियाणि त्वक्चक्षुषी स्वग्राह्यगुणाश्रयद्रव्यमपि गृह्णीतः श्रोत्रमपि चक्रवज्जलग्राहकं दूरे शब्द इति प्रतीतेः ।
वचनादानगमनविसर्गानंदजनकानि वाक्पाणिपादपायूपस्थाख्यानि कर्मेन्द्रियाणि एतच्च सर्वं मिलित्वा सप्तदशात्मकं लिंगं तदुक्तं
पंचप्राणमनोबुद्धिदशेन्द्रियसमन्वितं अपंचीकृतभूतोत्थं सूक्ष्मांगं भोगसाधनमिति अत्र ज्ञानशक्तिप्राधान्येन हिरण्यगर्भः क्रिया
शक्तिप्राधान्येन सूत्रात्मेत्युच्यते एतदभिन्नत्वेव सर्वलिंगशरीराणां समष्टिर्हिरण्यगर्भस्य तं अत्र व्यष्टिसमष्टी च जीवोपाधिरेव अयमे
वामूर्तस्वरूपः ननु तार्किकादिस्वीकृतः तानि च तथाभूतानि भूतानि भोगायतनं शरीरं भोग्यं च विषयमंतरेण भोगं जनयितुं नश
क्नुवंतीति तेन जीवकर्मप्रयुक्तत्वात् स्त्याल्लायप पंचीकृतानि भवंति तत्र प्रत्येकं भूतानि द्विधा विभज्य एकैकं भागं चतुर्धा विभजते तन्ना
गचतुष्टयं स्वभागं विहाय इतरभूतचतुष्टयार्द्धभागेन इतराष्टमभागेन च पंचीकरणं तेन नेयि आधिक्यात् आकाशादिव्यवहारः
तानि च पंचीकृतानि पंच महाभूतानि मूर्ताख्यानि मिलित्वैककार्यमिन्द्रियाणामधिष्ठानं भोगायतनं जनयंति तदेव शरीरमित्युच्यते
शरीरं चात्र विश्वस्य प्राक्प्रदर्शितमिति एवं चतुर्दशभुवनात्मकं घनोदकाख्य महाजलराशिमध्ये ऊर्ध्वाधोभावापन्नसंयुक्तकटाहद्व
यं तिष्ठति तन्मध्ये जलराशिः तदुपरि महानौरिव पंचाशत्कोटियोजनविस्तीर्णा महापृथ्वी सहस्रयोजनोन्नता तस्या दशसहस्र
योजनपरिमितभागेषु अधोधस्तदेकैकं पातालमित्थं सप्तपातालानि स्वर्गादप्यरम्याणि तदुपरि सप्त भुवनानि तत्र पादगम्यो भूर्लो न
कः तदुपरि भुवः स्वर्महर्जनस्तपो लोकः सत्यलोका इति षड्भुवनानि संयुक्तकटाहद्वयमध्यस्थानि कटाहद्वयस्योर्ध्वाधोभावा
पन्ने यद्घनोदकं तदेव त्रिविक्रमाख्यविष्णुचरणसरोजांगुष्ठलग्नच्छिद्रद्वारा कटाहांतः प्रविष्टं शिशुमारचक्रसुमेर्वादिपतनद्वारा

सप्ततिध

हिमालयाद्यवनीर्गंगारूपेण त्रिलोकीं पावयतीति तदेवं सत्वरजस्तमोगुणात्मकपंचीकृतपंचमहाभूतात्मकं सर्वं ब्रह्मांडमित्युच्यते
अयमेवमर्त्तपदार्थः इत्यौपनिषदः सृष्टिक्रमः एतद्विपरीतो लयक्रमः प्रलयपर्यंतः तत्र प्रलयो नाम त्रैलोक्यनाशः स हि चतुर्विधः
नित्यः प्राकृतो दैनंदिनः आत्यंतिकश्चेति तत्र नित्यप्रलयः सुषुप्तिः तस्याः सकलकार्यविलयस्वरूपत्वात् धर्माधर्मसंस्काराणां तु तदाका कार्य३
रणात्मनावस्थानात् तेन सुषुप्त्युत्थितस्य न सुखदुःखाद्यनुपपत्तिः न वा स्मरणानुपपत्तिः एतस्य च प्राक्प्रदर्शितत्वादनंतरं द्वैविध्यं प्रकाश्यते
तथाहि पंचीकृतपंचमहाभूततत्कार्यात्मकविराडाख्यमूर्त्तं पृथिव्याद्येकैकलयेनामूर्त्ते पंचीकृतपंचमहाभूतात्मके हिरण्यगर्भाख्ये स्व
कारणे लीयते अमूर्त्तं चाव्याकृते परमेश्वरोपाधौ. अव्याकृतस्य त्वनादित्वेनैव कारणाभावान्न लयः स्वकारणे स्वस्वरूपेणावस्थानं ल
य इति लक्षणात् अयमेव प्राकृतः प्रलयः प्रकृतौ संस्काररूपेणावस्थानस्यैव प्राकृतशब्दार्थत्वात् तथा च श्रुतिः तद्धेदं तर्ह्यव्याकृत
मासीत् नासदासीन्नो सदासीत्तदानीमित्यादि प्राकृतलये जगतः सद्रूपेणावस्थानात् सदेव सौम्येदमग्र आसीदित्यादि श्रुतस्तत्र च दैनंदि
नस्तु न संस्काररूपेण किंतु पृथिव्यादेः शतवर्षीघनावृष्ट्या शुष्कगोमयाकारेणावस्थितिपूर्वकत्वे सति संकर्षणमुखानलेन भूर्भुवः
स्वःस्वरूपलोकदाहात् तत्तापाक्रांत्या महर्लोकस्थप्रजे जनलोकं गते तु हिरण्यगर्भस्य सत्यलोकस्थस्य रात्रिर्भवति सैव दैनंदिनः प्रलयः
तत्र महर्लोकस्य तापितत्वेन निर्जनत्वेप्यनाशात् जनलोकादेश्चातापितत्वस्याप्यभावाद्विराजः सर्वांशेन न लयः किंतु दशभुवनीरूपैक
देशावच्छिन्नस्येति तदुक्तं त्रिलोक्यां दह्यमानायां शक्त्या संकर्षणाग्निना यात्यूष्मणा महर्लोकाज्जनं भृग्वादयोर्दिता इति ब्रह्मज्ञानेनो
च्छेद्यत्वादात्यंतिकः प्रलयः पुनः संसाराभावात् स च कारणोच्छेदमंतरा युगपदेव वाऽविद्यातत्कार्योच्छेदः श्रुत्यादिप्रमायामनुपादर्शनात्
न चाज्ञाननन्वयुक्तं दृश्योच्छेदेप्यनादिवस्तुस्य तत्त्वभिन्नत्वात्कथं निवृत्तिरिति वाच्यं अविद्यातत्कार्याभावेपि यदा अविद्या तदा चैतन्या अविद्याधीनत्वेन
दीति कालिकव्याप्त्याऽविद्योच्छेदेनैवोच्छेदात् अविद्योच्छेदस्तु सर्वोत्कृष्टशरीरत्रयात्प्रत्यगनुभवरूपस्य साक्षिणो ब्रह्माभेदज्ञानेन ।
न च तत्त्वमस्यादिमहावाक्याद्यधीन वाक्यपदार्थज्ञानद्वारैकत्वज्ञापकं महावाक्यार्थज्ञानत्वावच्छिन्नं प्रति पदार्थज्ञानत्वेन कारण
त्वात् तथाहि तत्पदस्य द्वावर्थौ वाच्यो लक्ष्यश्च अत्र सर्वज्ञो मायाशबलं ब्रह्म वाच्योर्थः स च यतो वा इमानि भूतानि जायंते येन जाता
नि जीवंति यत्प्रयंत्यभिसंविशंतीति तद्ब्रह्म विजिज्ञासस्व इति श्रुतिभिर्जगत्कर्तृत्वादिद्वारा तटस्थलक्षणेन प्रकाश्यते ननु स्वरूपलक्ष
णस्य सच्चिदानंदैकरसत्वात् तटस्थलक्षणं च यावल्लक्ष्यकालानवस्थितत्वे सति व्यावर्तकत्वं यथा नैयायिकादिमते गंधवत्त्वं पृथिवील
क्षणं महाप्रलये परमाणूत्पत्तिकाले घटादिषु गंधाभावात् गंधादिचतुष्टयस्य पृथिव्यां पाकजत्वस्वीकारात् प्रलयपरमाणुषु पा
काभावात् तदुक्तं तत्रापि परमाणोस्तु पाकोऽविशेषिकेनये नैयायिकानां तु नये घणुकादावपीष्यत इति मायाविनिर्मुक्तं तु लक्ष्यं तच्च
ब्रह्मविदाप्नोति परमित्यादौ किंतु ब्रह्मणि स्वरूपमात्रे आकांतामुत्थाप्य सत्यं ज्ञानमनंतं ब्रह्मेत्यादिश्रुतिभिः स्वरूपलक्षणेनैव
बोध्यते लक्ष्यलक्षणयोरभेदात् स्वविषयमिति वक्तव्यरूपेप्रविष्टत्वात् तदुक्तं तटस्थं स्वरूपं द्विधा लक्षणं स्वरूपेऽप्रविष्टं स्वरूपे निविष्टम्

आकाशस्यधावकत्वेन
भिन्नादर्थाद्वर्त्तकत्वात्स्य
स्वरूपाविष्टस्वरूपलक्षणं ०=

श्री की

यथाकाकचंचोर्गलकः स्वंविलं च एवं त्वंपदस्यापि द्वावर्थौ वाच्यो लक्ष्यश्च तत्र जाग्रत्स्वप्नसुषुप्त्यादिविशिष्टचैतन्यं वाच्योऽर्थः स च तथा
थाम्भहामत्स्य उभे कूले अनुसंचरति एवमेवायं पुरुषः एतावुभावंतावनुसंचरति स्वप्नांतं बुद्धांतं चेत्यादिश्रुतिभिः प्रतिपाद्यते तदस्य लक्षणेन
तद्रहितं ज्ञासकं सच्चिदानंदघनं तु लक्ष्यं तच्च योयं विज्ञानमयः प्राणेषु हृद्यंतर्ज्योतिः पुरुषः नद्रष्टुर्द्रष्टारं पश्येर्न दृष्टेर्द्रष्टारं इत्यादिश्रु
तिभिः स्वरूपलक्षणेनैव प्रतिपाद्यते एवमवांतरवाक्येभ्यः शुद्धतत्पदार्थशुद्धत्वंपदार्थबोधानंतरं आत्मविदात्मैव भवति तरति शोक
मात्मवित् तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति स्वरूपज्ञानस्यैव मोक्षहेतुत्वमवगम्य ततः कोहमित्याकांक्षया परमका
रुणिकेन वेदेन तत्त्वमसीत्युपदिष्टस्य ततः सर्वज्ञत्वसंसारित्वयोः कथमैक्यमिति विरोधस्फूर्त्या मुख्यार्थान्वयानुपपत्तिर्भवति ततो जहदज
१ के हल्लक्षणया सोयं देवदत्त इति तत्कालतद्देशोत्तत्कालतद्देशपरित्यागेनाविरुद्धदेवदत्तांशस्य साक्षात्कारवत् पदद्वयेपि शबलांशत्यागेन
मायिकसर्वांशपरि लक्षणया अथवा जहदजहल्लक्षणया सर्वांशत्यागेन गंगायां घोषवत् तत्स्मरणोपपत्याऽखंडसाक्षात्कारः अखंडत्वं तु सजातीयविजातीय
त्यागेन शुद्धचित्स्वरू स्वगतभेदशून्यत्वं सजातीयत्वं तु तार्किकादिस्वीकृतमात्मनानात्वं विजातीयत्वं च तैरेव स्वीकृतं परमाण्वादिनित्यवर्गत्वं स्वगतभेदत्वं
पोपपत्त्या=८ तु स्वमते संसारदशायामुपाधिभेदाद्भेदवत्त्वं तच्छून्यत्वमित्यर्थः अथवा विनाशक्तिं विनालक्षणां विनासंबंधांतरं सुषुप्त्युत्थापकवाक्यवत्तत्त्व
मस्यादिवाक्येनाखंडसाक्षात्कारः शब्दशक्तेरचिंत्यत्वात् न च विनासंबंधं बोधनेतिप्रसंगः लक्षणापक्षेपि तुल्यत्वात् शक्तसंबंधस्यानेकसा घटाद्यर्थांतरेषु
धारणत्वात् तात्पर्यविशेषो नियामक इति चेत् तस्यापि सर्वान्यत्वविशेषात् कश्चिदेव तात्पर्यविशेषमवधारयतीति न सर्व इति चेत् हंत तर्हि
प्रकरणार्थवेत्तृ वि पुरुषगत एव कश्चिद्विशेषो निर्दोषत्वादिरूपो नियामकः स चास्मिन्मतेपि तुल्य इत्यतः अतोऽस्मिन्मते शब्दस्यैव विषयत्वाद्यतो वाचो
ज्ञातादि निवर्तंते अप्राप्य मनसा सहेत्यादिश्रुतयः प्रमाणं तदुक्तं वार्तिके दुर्बलत्वादविद्याया आत्मत्वाद्बोधरूपिणः शब्दशक्तेरचिंत्यत्वा
द्विद्मस्तं मोहहानतः १ अगृहीत्वैव संबंधमभिधानाभिधेययोः हित्वा निद्रां प्रबुध्यंते सुषुप्ते बोधिताः परैः २ जाग्रद्वन्न यतः शब्दं सुषुप्ते
वेत्ति कश्चन ध्वस्तेतो ज्ञानतोऽज्ञाने ब्रह्मास्मीति भवेत्फलं ३ अविद्याघातिनः शब्दाद्याहं ब्रह्मेति धीर्भवेत् नश्यत्यविद्यया सार्द्धं हत्वा रो
गमिवौषधं इति तस्मात्तत्त्वमस्यादिवाक्यजन्याखंडाकारमनोवृत्त्या सजातीयप्रत्ययस्रवकविजातीयप्रत्ययरहितया तत्कार्यस
कलानर्थनिवृत्तिरिति शिवम् तदुक्तं वार्तिककृद्भिः तत्त्वमस्यादिवाक्यात्तु सम्यग्धीजन्ममात्रतः अविद्यासहकार्येण नासीदस्ति
भविष्यति इति सदृष्टिपूर्णत्यादि प्रपंचनिरूपणं सर्वसप्रकृष्टिवदपारमार्थिकमप्यनादिवासनादार्ढ्यान्मिथ्यात्वज्ञानात्सर्वं ऊर्द्ध
वा तस्य साक्षात्कारात्पूर्वं निःकंपप्रवृत्तिर्हेयं तत्त्वसाक्षात्कारानंतरं तु नैवमहंत्यादि बलवत्तरप्रारब्धवशात्सकंपप्रवृत्तिजनकं
वा तदुक्तं शास्त्रेण नश्यत्परमार्थबुद्धिः कार्यक्षमं नश्यति चापरोक्षात् प्रारब्धनाशात्प्रतिभासनाशो न विधा नश्यति चात्ममायेति ।
तथा चैवंप्रकारेण मायानिवृत्तिरेव मोक्षः स चैकजीववादे युगपदेव नानाजीववादे तु क्रमेण ननु एवं तत्त्वज्ञानादेकस्य मुक्तौ सर्वेषां मु
या क्तिः स्यादविद्याया एकत्वादिति चेत् इष्टापत्तिरित्येके अपरे तन्न दोषपरिहाराय इंद्रो मायाभिः पुरुरूप ईयते तथा पादेवानाना प्रत्यग्भुंज्यत सराव

स्व॰ प्र॰ १२

तदभवत्तथर्षीणां तथा मनुष्याणामित्यादिबहुवचनश्रुत्यनुगृहीतमविद्यानानात्वमंगीकर्त्तव्यमित्याहुः प्रतिजीवं संसारभेद
श्च नचयो घटो मयादृष्टः स एवत्वयेति कथमितिवाच्यं सादृश्यात् एकस्याश्छोदश पुरुषीयभ्रमवत् अन्ये तु एकैवाविद्या
यावज्जीवभेदेन ब्रह्मस्वरूपावरणायशक्तयो नाना तथा च यस्य ब्रह्मज्ञानमुत्पद्यते तस्यैव ब्रह्मस्वरूपावरणशक्तिविशिष्टाविद्या
नाशः न तत्वन्यस्य तीनसुमुक्षुरूपगमात् नैकमुक्तौ सर्वमुक्तिप्रसंगः प्रारब्धस्य विद्यमानत्वात् न वा विदेहकैवल्यम् अत एव यावदधिकार
काशि मवस्थितिरधिकारिणामित्यस्मिन्नधिकरणे धियुक्तयारणामुत्पन्नतत्वज्ञानानामिशदीनां देहधारणानुपपत्तिमाशंक्याधिका
रापादकप्रारब्धकर्मसमाप्त्यनंतरं विदेहकैवल्यमिति सिद्धांतितमितिदिक् वस्तुतस्त्वेकजीववादनानाजीववादादिविभ्रमाणां
तत्वज्ञानात्प्रागेवानुभवः अविद्याविजृंभितत्वात् अत एव नतद्दृढतराभिनिवेशेन वादिनास्वपक्षस्थापनपरपक्षदूषणप्रयासः
संभवति न त्वद्वितीयात्मतत्वसाक्षात्कारानंतरं स्वातिरिक्तस्य प्रपंचज्ञानस्य मायागंधर्वनगरवत् मिथ्यास्फुरणे नाविद्यातत्कार्य
स्यैवालीकत्वात् तथा चाविद्यावत्स्वरूपस्यैवाविद्यानत्वविदृष्ट्या तदुक्तं वार्तिककृद्भिः अहमेव परं ब्रह्म स्वस्यार्थस्याप्रबुद्धता अ
विद्येति वपदूमोयेहनास्मि सदात्मनि १ अविद्यमानेवाविद्यावस्तुतत्त्वविचारिणां अविचारेण महानावज्ञादपिदृढायते तु
तस्मादनन्ते तत्त्वसमास्त्वविद्याचिदात्मनि अयुक्ता नस्यहसैषा न वेषीतनुभूयते इति श्रुतिश्च विद्वदनुभवप्रमाणं न निरो
धो न चोत्पत्तिर्न बद्धो न च साधकः न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता स्मृतिश्च कालेनानादिसत्त्वं मुक्तः शुकादिः कालोऽनंतो मो
क्ष्यतेतत्र चान्येः इत्येवं हि बंधमोक्षव्यवस्था संसिद्धिः स्यादात्मप्रबोधात् वाशिष्ठेपि अनात्मन्यात्मधीर्बंधस्तन्नाशो मोक्ष उच्य
ते बंधमोक्षौ न विद्येते नित्यमुक्तस्य चात्मन इति अद्वैतकंदरे आत्माज्ञानमहानिशाजृंभिते स्मिन् जगन्मये दीर्घस्वप्ने स्फुरंत्येते स्वर्ग
मोक्षादिविभ्रमा इति ननु नहि कथं कल्पितबंधनिवृत्त्यर्थं मुमुक्षूणां श्रवणादौ प्रवृत्तिरिति चेदुच्यते सर्वोक्ततत्त्वज्ञानात्प्राक्
सत्यत्वेनात्मन्यनुभूयमानस्य संसारदुःखस्य निवृत्त्यर्थं प्रवृत्त्युपपत्तेः कल्पितस्यापि दुष्टस्वप्नरूपपापस्य प्रायश्चित्तार्थं प्रवृत्तिदर्शना
च्च एतेन यथैकस्मिन् कल्पे यथैकैकोऽपि प्रमुच्यते तथा प्युच्छिन्नः संसारः स्यात् अतीतकल्पानामनंतत्वात् तथा च प्रवृत्तिरेवं प्रश्रय
णीन निवृत्तिरित्यादिप्राभाकरवाल्लितमपास्तं नहि श्रुतिसिद्धस्य मुक्तानुभवसिद्धस्य च मोक्षस्यानंतरं प्रवृत्तेनाम तर्केण बा
धः कर्तुं शक्यते श्रुतिप्रमाणापेक्षया अनुमानादिप्रमाणानां दुर्बलत्वस्य शास्त्रे प्रसिद्धत्वात् सर्वस्यापि श्रुतिस्मृतीतिहासपुरा
णादिवाक्यस्य मोक्षप्रतिपादने पर्यवसानस्यानर्थकं च स्यादिति विस्तरस्तु स्वरूपनिर्णये तु संधेयइति दिक् नन्वस्त्विवं वे
द दनुभवस्तथाप्यविद्यानिवर्तकं वाक्यजन्यवृत्तिः करणवृत्त्युपारूढं स्वरूपचैतन्यं तदाधाररूपा वृत्तिर्वा नाद्यः तस्येदानी
मपि सत्वात् न द्वितीयः तस्याश्चिदभिन्नत्वे नास्तित्वात् तथा च सत्या सत्यसिद्धेरयोगात् जानामीतिज्ञप्तिरूपचिद्विरोधस्य वा
तुभवसिद्धत्वात् इति चेत् न अविद्यानिवर्तकं यद्यपि स्वप्रकाशं स्वरूपचैतन्यं तस्याविद्यासाधकत्वात्तथापि श्रवणादिसा।

६

राम: १२

आपरोक्षवृत्तिसमारूढं तदेव निवर्त्तकं भवति तदुक्तं वार्त्तिके तृणादेर्भासिकाप्येषा सूर्यदीप्तिस्तृणान्दहेत् सूर्यकान्तमुपारुह्य तं
न्यायं शास्त्र योजयेदिति ननु तर्हि केवलाविद्यानाशकं ब्रह्मज्ञानं कथं नश्येत् नाशकान्तराभावादिति चेच्छृणु यथा कतककरजः सलिले
न संयुज्य पूर्वयुक्तं रजोन्तरं विश्लेषं जनयन् स्वविश्लेषमपि जनयति तथात्मन्यध्यस्यमानं ब्रह्मज्ञानं सर्वाध्यस्तसमस्तप्रपंचं निवर्त्त्य
यत्स्वात्मानमपि निवर्त्तयतीति तदुक्तं अज्ञानकलुषं जीवं ज्ञानाभ्यासाद्विनिर्मलं कृत्वा ज्ञानं स्वयं नश्येज्जलं कतकरेणुवदिति अपरे के
यमविद्यानिवृत्तिरात्मरूपा वा तद्व्यतिरिक्ता आद्ये असाध्यत्वापत्तेः द्वितीयेपि किं मिथ्या सती वा आद्ये अविद्यातत्कार्यान्यतरापत्तिः द्विती
ये त्वद्वैतहानिरिति चेन्मैवं चरमवृत्त्युपलक्षितात्मनोऽविद्यानिवृत्तिस्वरूपाङ्गीकारात् न चोपलक्षणनिवृत्त्या मुक्तेरपि निवृत्तिरिति वाच्य
पाके निवृत्तेपि पाचकानिवृत्तेर्दर्शनेन व्यभिचारात् तदुक्तं वार्त्तिके निवृत्तिरात्ममोहस्य ज्ञातत्वेनोपलक्षिते उपलक्षणनाशेपि स्यान्मु
क्तिः पाचकादिवदिति ननु वृत्त्युपलक्षितस्यात्मनो वृत्तेः पूर्वमपि विद्यमानत्वेन मोहकालेपि मोहहान्यापत्तिरिति चेन्नोक्तोत्तरत्वात् सर्वसिद्ध
स्योपलक्षणत्वायोगात् नहि पाकसंबन्धात्पूर्वं पाचको भवति तथात्र वृत्त्यभावे वा ननु तथापि कथं नष्टाविद्यस्य जीवन्मुक्तस्याज्ञवद्व्यवहारः
उपादानस्य नाशात् अथाविद्यालेशानुवृत्तेरिति चेत्तर्हि कोयमविद्यालेशो यत्सत्त्वे यथापूर्वं कर्तृत्वादिप्रतिभास इति चेच्छृणु तस्या
वधानेन आवरणविक्षेपशक्तिमत्या मूलाऽविद्याया विद्ययानाशेपि प्रारब्धकर्मवर्तमानदेहाद्यनुवृत्तिप्रयोजको विक्षेपशक्त्यंशः
तदुक्तं अविद्यावृतितादात्म्ये विद्ययैव विनश्यतः विक्षेपस्य स्वरूपं तु प्रारब्धक्षयमीक्षते १ उपादाने विनष्टेपि क्षणं कार्यं प्रवर्त्तते
इत्याहुस्तार्किकास्तद्वदस्माकं किं न संभवेत् २ तन्तूनां दिनसंख्यानां तैस्तादृक्क्षण ईरितः भ्रमस्यासंख्यकल्पस्य योग्यः क्षण इहेष्यतां ३ वेगा
मोपि शीघ्रमस्मादुदन्तो वानरादिति शिरोव्रणस्येवासेन शनैः शाम्यति नो तदा ४ शमयत्यौषधेनायं दशमः स्वव्रणं यथा भोगेन शमयत्येत
त्प्रारब्धं भुज्यते तदा ५ भोगकाले कदाचित्तु मर्त्योहमिति भासते नैतावतापराधेन तत्त्वज्ञानं विनश्यति ६ जीवन्मुक्तिव्रतं नेदं किन्तु वस्तुस्थि
तिः स्वस्थितिः अपरे निरवयवस्याज्ञानस्य लेशाऽसंभवेपि क्षालितलशुनभाण्डस्थलशुनवासनावत् अविद्यासंस्कारस्तत्राचु तेनैव व्य
वहारोपपत्तेः तदुक्तं भामत्यां नैवल्वयं सर्वथा मनुष्याभिमानरहितः किंत्वविद्यासंस्कारानुवृत्त्या तदभिमानोनुवर्त्तते अनुवर्तमानं चामि
थ्येति मन्यमानो न श्रद्धत्त इत्युक्तं विधिषु प्राप्तोधिकारी नष्टाव इति वार्तिककृद्भिः प्रोक्तं ननु ब्रह्मत्वधीर्यदि देहत्वस्येति बाधतः निवर्त्तेत
तथाहंत्वधीरप्यहंत्वबाधतः १ नैष दोषो यतो बोधः कृत्स्नाज्ञानं दहन्नपि न दहेद्भोगहेतुं तत्प्रारब्धप्रतिबन्धतः २ मण्यादयो यथा वह्नेः प्रतिबन्ध
तिदग्धता ननु प्रकाशसामर्थ्यं तथात्र प्रतिबन्धने ३ भोगेनोपयुक्तं देहादिव्यवहारं न बाधते विद्ययानुपयुक्तं तु बाध्यतां जीवितां भ्रमः ४
मुक्तो वासना यथा वेगस्यैव निवृत्तिर्नान्यथा अप्रमोदे हन्त यथा वायुर्लयेपि नतिनान्यथा ५ सुखदुःखविकारास्तु धियः सात्वभासतः भोगः प्रो
क्तः सभोगश्च समानोस्त्वहं तद्वयोः ६ भोक्तृत्वमपि कर्तृत्वं चिदाभासगतं चिति मूढैरारोप्यते दृष्टो नैतेवमम ता नेयां ७ इति तस्मात्
वरणादिसर्वं कर्म महावाक्यावगमाज्जीवन्मुक्तिसिद्धिः अनारब्धेन ष्टेपि प्रारब्धस्यानाशात् तथा च श्रुतिः भिद्यते हृदयग्रन्थिश्छिद्यन्ते

स्व॰ प्र॰ १२

सर्वसंशयाः क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे इति तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशादिति सूत्राच्चेति दिक् ।
ननु कथं वा क्वापि दर्शनमात्राज्जीवन्मुक्तिस्तस्या भगवत्पतञ्जलिनाऽष्टाङ्गयोगसाध्यत्वप्रतिपादनात् यमनियमासनप्राणायामप्र
त्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि तत्राहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः शौचसंतोषतपःस्वाध्यायेश्वरप्रणि
धानानि नियमाः स्थिरसुखमासनं पद्मकस्वस्तिकाद्यनेकविधं रेचककुम्भकपूरकादिर्बहुविधः प्राणायामः श्रोत्रादीनामिन्द्रि
याणां स्वस्वविषयेभ्यो विमुखीकरणं प्रत्याहारः हृत्पुण्डरीकादौ मनसः स्थिरकालस्थापनं धारणा एवमेकत्र धृतस्य चित्तस्य विच्छिद्य भावो
प्रत्यय कारवृत्तिप्रवाहो ध्यानं सर्वथा विजातीयप्रत्ययरहितसजातीयप्रवाहः समाधिः स च चित्तभूमिभेदेन द्विविधः सम्प्रज्ञातोऽसम्प्रज्ञा
तश्चेति तत्र चित्तस्य पञ्च भूमयो भवन्ति क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति तत्र रागद्वेषादिवशात्सर्वदा विषयेष्वभिनिविष्टं चित्तं
क्षिप्तं तमसोद्रिक्तं मूढं सर्वदा विषयासक्तमपि कदाचिद्ध्याननिष्ठं तमादिविशिष्टतया विक्षिप्तं तत्र क्षिप्तमूढयोः समाधिशङ्कै
व नास्ति विक्षिप्ते तु चेतसि कादाचित्कः समाधिर्भवति स तु विक्षेपप्राधान्येन योगपक्षे नास्ति किंतु तीव्रतरपवनविक्षिप्तप्रदीपवत्
स्वयमेव नश्यति एकाग्रं तु एकविषयधारावाहिकवृत्तिसमर्थं सत्त्वोद्रेकेण तमोगुणकृतनिद्रादिरूपलयाभावात् स्वात्माकारवृ
त्तिः सा च रजोगुणकृतचाञ्चल्यरूपविक्षेपाभावात् एकविषये वृत्तिः शुद्धसत्त्वे भवति चित्तमेकाग्रं अस्यां भूमौ सम्प्रज्ञातः
समाधिः तत्र ध्येयाकारवृत्तिरपि भासते तदुक्तं ब्रह्माकारमनोवृत्तिप्रवाहोऽहंकृतिं विना सम्प्रज्ञातसमाधिः स्याद्ध्यानाभ्यास
प्रकर्षतः इति एतस्या अपि निरोधेऽसम्प्रज्ञातः समाधिर्भवति सूत्रितं च भगवता पतञ्जलिना तस्यापि निरोधे सर्ववृत्तिनि
रोधान्निर्बीजः समाधिः तथा चैतादृशस्य चित्तनिरोधस्य सम्पादयितुमशक्यत्वात्कथं जीवन्मुक्तिः कथं वाऽज्ञानतत्कार्यनि
वृत्तिः तदुक्तं अप्यब्धिपानान्महतः सुमेरून्मूलनादपि अपि वह्न्यशनात्साधो विषमश्चित्तनिग्रहः इति चेत्सत्यं यद्यपि दुष्करो
स्याच्चित्तनिरोधः सर्वकालं साक्षात्कारो जीवन्मुक्तिसम्पादकस्तथा जडाचेतनविवेकोऽपि श्रवणादिसर्वको जीवन्मुक्तिसम्पादकः
न केवलं योग एव तदुक्तं वाशिष्ठे द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानं च राघव योगो वृत्तिनिरोधो हि ज्ञानं सम्यगवेक्षणम् १ असा
ध्यः कस्यचिद्योगः कस्यचित्तत्त्वनिश्चयः प्रकारौ द्वौ ततो देवो जगाद परमः शिव इति २ श्रवणं तु सर्वेषां वेदान्तानामद्वितीये ब्रह्मणि
तात्पर्यावधारणं मननं तु श्रवणेनावधारितस्यार्थस्य प्रमाणगतप्रमेयगतासंभावनाविपरीतभावनानिरासार्थं नानायुक्ति
भिश्चिन्तनं निदिध्यासनं तु श्रवणमननाभ्यां निश्चितस्याद्वितीयस्वरूपस्य सजातीयप्रत्ययसर्वं विजातीयराहित्यं न तु श्रवण प्रत्यय
मात्रेण तदुक्तं कुशला ब्रह्मवार्तायां वृत्तिहीनाः सुरागिणः तेऽप्यज्ञानतमं नूनं पुनरायान्ति यान्ति चेति अत एव भगवत्पूज्यपा
दाः कुत्रापि ब्रह्मविदो योगापेक्षां न चक्रुस्त्यागं दर्शयांबभूवुः अत एवोपनिषदाः परमहंसाः श्रौतवेदान्तविज्ञान एव गुरुमुपसृत्य
प्रवर्तन्ते ब्रह्मसाक्षात्काराय न योगे तस्य रागद्वेषग्रस्तान्तःकरणपरत्वात् तदुक्तं बहुव्याकुलचित्तानां विचारात्तत्त्वधीर्नहि

रामः १२

योगेन त्वव्यमत्तस्ते सा धीदर्पणेन नश्यति १ अव्याकुलधियां मोहमात्रेणाच्छादितात्मनां सांख्यनामा विचारः स्यान्मुख्यो ऽदीति सिद्धिदः इति
अथ च भगवत्पादैः स्वमतानुसारेणैव सूत्रसमस्याख्यानत्वात् तथा हि देहेन्द्रियेषु वैराग्यं यम इत्युच्यते बुधैः अनुरक्तिः परे तत्त्वे नियमः
परिकीर्तितः १ सर्ववस्तुन्युदासीनभाव आसनमात्मनः जगत्सर्वमिदं मिथ्या प्रतीतिः प्राणसंयमः २ चित्तस्यान्तर्मुखीभावः प्रत्याहारः स उ
च्यते चित्तस्य निश्चलीभावो धारणा सा निगद्यते ३ सोऽहं चिन्मात्रमेवेति चिन्तनं ध्यानमुच्यते ध्यानेन विस्मृतिः सम्यक् समाधिरभिधीय
ते ४ इति अनन्तरं भगवता वशिष्ठेन भूमिकाभेदेन जीवन्मुक्तानामपि भेदा निरूपिताः तथा हि ज्ञानभूमिः शुभेच्छाख्या प्रथमा सा प्रकीर्ति
ता विचारणा द्वितीया स्यात्तृतीया तनुमानसा १ सत्त्वापत्तिश्चतुर्थी स्यात्ततो ऽसंसक्तिनामिका पदार्थाभावनी षष्ठी सप्तमी तुर्यगा स्मृता इति २
तत्र नित्यानित्यवस्तुविवेकादिपुरःसरा फलपर्यवसायिनी मोक्षेच्छा प्रथमा १ ततो गुरुमुपसृत्य वेदान्तवाक्यविचारः श्रवणमननात्मिका द्वि
तीया २ ततो निदिध्यासनाभ्यासेन मनस एकाग्रतया सूक्ष्मवस्तुयोग्यत्वं तृतीया ३ एतद्भूमिकात्रयं साधनरूपं जाग्रदवस्थोच्यते यो
गिभिर्भेदेन भानात् तदुक्तं भूमिकात्रितयं त्वेतद्राम जाग्रदिति स्थितं यथावद्भेदबुद्ध्येदं जगज्जाग्रति दृश्यते इति ततो वेदान्तवाक्यान्नि
र्विकल्पको ब्रह्मात्मैक्यसाक्षात्कारश्चतुर्थी भूमिका [illegible] त्रितयस्य फलरूपा सत्त्वापत्तिः स्वप्नावस्थोच्यते सर्वस्यापि जगतो मि
थ्यात्वेन स्फुरणात् तदुक्तं अद्वैते स्थैर्यमायाते द्वैते च प्रशमं गते पश्यन्ति स्वप्नवल्लोकं चतुर्थीं भूमिकामिता इति सोऽयं चतुर्थभूमिं प्राप्तो
योगी ब्रह्मविदित्युच्यते पञ्चमी षष्ठी सप्तमी तु भूमिका जीवन्मुक्तेरवान्तरभेदाः तत्र सविकल्पकसमाध्यभ्यासेन निरुद्धे मनसि या निर्वि
कल्पकसमाध्यवस्था साऽसंसक्तिरिति सुषुप्तिरित्युच्यते ततः स्वयमेव व्युत्थानात् सोऽयं योगी ब्रह्मविद्वरः ५ ततस्तदभ्यासपरिपाकेन
चिरकालावस्थायिता गाढसुषुप्तिरिति चोच्यते ततः स्वयमनुत्थितस्य योगिनः परप्रयत्नेनैव व्युत्थानात् सो ब्रह्मविद्वरीयान् ६ यस्या
स्तु समाध्यवस्थायां न स्वतो न वा परतो व्युत्थितो भवति सर्वथा भेददर्शनाभावात् किंतु सर्वदा तन्मय एव स्वप्रयत्नमन्तरेणैव परमे
श्वरप्रेरितप्राणवायुवशादन्यैर्निर्वाह्यमानदैहिकव्यवहारः परिपूर्णपरमानन्दघन एव सर्वं तिष्ठति सा सप्तमी तुरीयावस्था तां प्रा
प्तो योगी ब्रह्मविद्वरिष्ठ इत्युच्यते ७ तदुक्तं चतुर्थी भूमिका ज्ञानं तिस्रः स्युः साधनं पुरा जीवन्मुक्तेरवस्थास्तु परास्तिस्रः प्रकीर्ति
। ता इति अत्र चतुर्थभूमिं प्राप्य स्थितस्य मृतस्य वा अष्टाङ्गयोगसाध्यजीवन्मुक्त्यभावेऽपि तत्त्वज्ञानमात्रसाध्यजीवन्मुक्तिप्रति
विदेहकैवल्यं तु पतति नास्ति शंका तदनन्तरभूमित्रितयस्य तु किमु वक्तव्यमिति परमरहस्यं ननु अष्टाङ्ग[illegible]योगं विनाऽन्तकाले मूर्छा
दिना ज्ञाननाशे पुनः संसारापत्तिरिति चेन्न अन्तकालशब्देन किमज्ञानकाल उच्यते प्राणवियोगो वा आद्ये श्रवणादिनैव नाशा
०शा८ सिद्धस्य साधुज्ञानानङ्गीकारात् द्वितीये तु प्रारब्धप्राबल्यान्मूर्छादिना प्राणवियोगेऽपि तत्त्वज्ञानाविरोधित्वेन न संसारापत्तिः तदुक्तं
सद्वैते न तद्वैते यदन्योन्यैक्यवीक्षणं तस्मिन् कालस्तद्भेदबुद्धिरेव न चेतरः १ यद्वा न कालः प्राणस्य वियोगस्तु प्रसिद्धितः तस्मिंस्तु
काले विभ्रान्ते न गता या पुनरागमः २ नीरोग उपविष्टो वा रुग्णो वा विलुठन् भुवि मूर्छितो वा त्यजन्त्वेष प्राणान्भ्रान्तो न सर्वथा ३ इति

स्व॰
प्र॰
१४

दिने स्वप्नसुप्तो ऽर धीते विस्मृते ऽप्ययं परेद्युर्नानधीतः स्यात् तद्वद्विद्या न नश्यति ॥ प्रमाणगोत्पादिता विद्या प्रमाणं प्रबलं विना न नश्य
ति न वेदान्तात्प्रबलमानमीक्ष्यते ॥ इति काशीह च तत्त्वज्ञ वा काश्यां श्वपचस्य गृहेऽथवा ज्ञानसंप्राप्तिसमये मुक्तोऽसौ विगतज्वरः
इति उक्तं च भगवता पतंजलिना प्यार्यपंचाशिकायां तीर्थे श्वपचगृहे वा नष्टस्मृतिरपि परित्यजन्देहं ज्ञानसमकालमुक्तः कैव
ल्यं जाति हतशोकः ॥ यमेधया तसहस्राण्यथ कृतं ब्रह्मध्यानतल्लानि परमात्म विन्नपुण्ये न च पापे र्लिप्यते विमले इति ।
तस्मात्सिद्धं पातंजलोक्ताष्टांग योगं विनापि वेदांतविचारेण श्रवणादिद्वर्द्धेन कैवल्यमिति शिवम् ॥ नमामि वाङ्मनःका
येर्ब्रह्मानंदस्वरूपं सदा यत्कृपालेशेन स्वस्वरूपस्फुरणं हि मे ॥ १ ॥ इति श्रीसदानंदविरचिते स्वस्वरूपप्रकाशे द्वयपदार्थप्रकाशन
पूर्वक जीवब्रह्मैक्यप्रकाशनं नाम चतुर्थः परिच्छेदः ॥ ४ ॥ कुविश्वकुञ्जवृषे विक्रमस्य सिते [illegible] तिथ्यां फाल्गुनस्य स्वस्वरूपाख्यप्रका
शो विद्वत्प्रियधनेयालालशर्म्मीप्यालिखत्तम् ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ मंगलं लेखकस्यास्तु पाठकस्यास्तु मंगलं शिवम्

प्रथमं चोत्तये तीर्थप्रसादेन गोलं शुचि
श्रवणास्य ततः स्नायाद्यथाविन्मंत्रयोगतः
पूर्वमावाहनं तीर्थेमुंडनं तर्पनं तरं
ततः स्नानादिकं कुर्यात्पश्चाछ्राद्धं
समाचरेत् गयास्नानं प्रकु
र्वीत वपनं तर्पनं तरामितितन्मते
स्नानपरं उपवासस्तीर्थप्राप्तिपूर्व
दिने तद्दिने वेति विकल्पः
स्नानमंत्रः ओं नमो देव देवाय
शितिकंठाय दंडिने रुद्राय वा
मनसाय चक्रेशाय वेधसे नमः
सरस्वती च सावित्री वेदमाता गरी
यसी सन्निधात्री भव त्वत्र तीर्थे
पापप्रणाशिनी ।। मार्गे तरा नदी प्रा
प्तौ स्नानादि परपात ततः प्रवीणे वस्तर
स्वत्पा एव मार्गगतो विधिः

ॐ देवा ऊचुः

यदुद्भवाः सत्वरजस्तमोगुणाः सर्ग
स्थितिध्वंसनिदानकारिणः य
दिच्छयाविश्वमिदंभवाभवौतनो
तिमूलप्रकृतिंनतास्मतां ॥१॥
याहित्रियोविंशतिभेदसंविता
जगत्परोवैसमधिष्ठितापरा
यद्रूपकर्माण्यजशंकरादयः
वदंत्यपिदेवानविदुर्नतास्म
तां ॥२॥ यद्भक्तियुक्ता
पुरुषास्तुनित्यंदारिद्र्यधी
मोहपराभवादीन्नप्राप्नुवंत्यं